कालद्रव्य अनादिनिधन है, वर्तना उसका लक्षण माना गया है (जो द्रव्योंकी पर्यायोंके बदलनेमें सहायक हो उसे वर्तना कहते हैं) यह कालद्रव्य अत्यन्त सूक्ष्म परमाणु बराबर है और असंख्यात होनेके कारण समस्त लोकाकाशमें भरा हुआ है। भावार्थ—कालद्रव्यका एक एक परमाणु लोकाकाशके एक एक प्रदेशपर स्थित है ॥२॥ वह कालद्रव्यमें अनन्त पदार्थोंके परिणमन करानेकी सामर्थ्य है अतः वह स्वयं असंख्यात होकर भी अनन्त पदार्थोंके परिणमनमें सहकारी होता है ॥३॥ जिस प्रकार कुम्हारके चाकके घूमनेमें उसके नीचे लगी हुई कील कारण है उसी प्रकार पदार्थोंके परिणमन होनेमें काल द्रव्य सहकारी कारण है। संसारके समस्त पदार्थ अपने अपने गुणपर्यायों द्वारा स्वयमेव ही परिणमनको प्राप्त होते रहते हैं और काल द्रव्य उनके उस परिणमनमें मात्र सहकारी कारण होता है। जब कि पदार्थोंका परिणमन अपने अपने गुणपर्याय रूप होता है तब अनायास ही सिद्ध हो जाता है कि वे सब पदार्थ सर्वदा पृथक् पृथक् रहते हैं अर्थात् अपना स्वरूप छोड़कर परस्परमें मिलते नहीं हैं ॥४॥ जीव, पुद्गल, धर्म, अधर्म, आकाश ये पाँच अस्तिकाय हैं अर्थात् सत्स्वरूप होकर बहुप्रदेशी हैं। इनमें काल द्रव्यका पाठ नहीं है, इसलिए वह है ही नहीं इस प्रकार कितने ही लोग मानते हैं परन्तु उनका वह मानना ठीक नहीं है क्योंकि यद्यपि एक प्रदेशी होनेके कारण काल द्रव्यका पंचास्तिकायोंमें पाठ नहीं है तथापि छह द्रव्योंमें तो उसका पाठ किया गया है। इसके सिवाय युक्तिसे भी काल द्रव्यका सद्भाव सिद्ध होता है। वह युक्ति इस प्रकार है कि संसारमें जो घड़ी घण्टा आदि व्यवहार कालप्रसिद्ध है वह पर्याय है। पर्यायका मूलभूत कोई न कोई पर्यायी अवश्य होता है क्योंकि बिना पर्यायीके पर्याय नहीं हो सकती इसलिए व्यवहार कालका मूल-

१ परिच्छिन्नः निश्चितः । २ उपकारे । –रुपग्रहः म० । ३–ग्रहो मतः प० । ४ स्वसामर्थ्यात् । ५ विवर्त- द०,स०,प०,म०,ल० । ६ यथायोग्यम् । ७–स्वगुण-स०, ल०, । ८ परस्परसंकरः । ९ द्राविडाः । १० उपायः ।

[1]मुख्यकल्पेन कालोऽस्ति व्यवहारप्रतीतितः। मुख्यादृते न गौणोऽस्ति सिंहो माणवको यथा ॥७॥
प्रदेशप्रचयापायात्कालस्यानस्तिकायता। [2]गुणप्रचययोगोऽस्य द्रव्यत्वादस्ति सोऽस्त्यतः ॥८॥
अस्तिकायश्रुतिर्वक्ति कालस्यानस्तिकायताम्। सर्वस्य सविपक्षत्वा[3]ज्जीवकायश्रुतिर्यथा ॥९॥
कालोऽन्यो व्यवहारात्मा मुख्यकालव्यपाश्रयः[4]। परापरत्वसंसूच्यो वर्णितः सर्वदर्शिभिः ॥१०॥
वर्त्तितो [5]द्रव्यकालेन वर्त्तनालक्षणेन यः। कालः पूर्वापरीभूतो व्यवहाराय [6]कल्प्यते ॥११॥
समयावलिकोच्छ्वास-नालिकादिप्रभेदतः। ज्योतिश्चक्रभ्रमायत्तं कालचक्रं विदुर्बुधाः ॥१२॥
[7]भवायुःकायकर्मादिस्थितिसङ्कलनात्मकः[8]। सोऽनन्तसमयस्तस्य परिवर्त्तोऽप्यनन्तधा[9] ॥१३॥
उत्सर्पिण्यवसर्पिण्यौ द्वौ भेदौ तस्य कीर्तितौ। उत्सर्पादवसर्पाच्च बलायुर्देहवर्ष्मणाम्[10] ॥१४॥

भूत मुख्य काल द्रव्य है। मुख्य पदार्थके बिना व्यवहार-गौण पदार्थ की सत्ता सिद्ध नहीं होती जैसे कि वास्तविक सिंहके बिना किसी प्रतापी बालकमें सिंहका व्यवहार नहीं किया जा सकता वैसे ही मुख्य कालके बिना घड़ी, घण्टा आदिमें काल द्रव्यका व्यवहार नहीं किया जा सकता। परन्तु होता अवश्य है इससे काल द्रव्यका अस्तित्व अवश्य मानना पड़ता है ॥६-७॥ यद्यपि इसमें एकसे अधिक बहुप्रदेशोंका अभाव है इसलिए इसे अस्तिकायोंमें नहीं गिना जाता है तथापि इसमें अगुरुलघु आदि अनेक गुण तथा उनके विकारस्वरूप अनेक पर्याय अवश्य हैं क्योंकि यह द्रव्य है, जो जो द्रव्य होता है उसमें गुणपर्यायोंका समूह अवश्य रहता है। द्रव्यत्वका गुण पर्यायोंके साथ जैसा सम्बन्ध है वैसा बहुप्रदेशोंके साथ नहीं है। अतः बहुप्रदेशोंका अभाव होनेपर भी काल पदार्थ द्रव्य माना जा सकता है और इस तरह काल नामक पृथक् पदार्थकी सत्ता सिद्ध हो जाती है ॥८॥ जीव, पुद्गल, धर्म, अधर्म और आकाशको अस्तिकाय कहनेसे ही यह सिद्ध होता है कि काल द्रव्य अस्तिकाय नहीं है क्योंकि विपक्षीके रहते हुए ही विशेषणकी सार्थकता सिद्ध हो सकती है। जिस प्रकार छह द्रव्योंमें चेतन रूप आत्म-द्रव्यको जीव कहना ही पुद्गलादि पाँच द्रव्योंको अजीव सिद्ध कर देता है उसी प्रकार जीवादिको अस्तिकाय कहना ही कालको अनस्तिकाय सिद्ध कर देता है ॥९॥ इस मुख्य कालके अतिरिक्त जो घड़ी घण्टा आदि है वह व्यवहारकाल कहलाता है। यहाँ यह याद रखना आवश्यक होगा कि व्यवहारकाल मुख्य कालसे सर्वथा स्वतन्त्र नहीं है वह उसीके आश्रयसे उत्पन्न हुआ उसकी पर्याय ही है। यह छोटा है, यह बड़ा है आदि बातोंसे व्यवहारकाल स्पष्ट जाना जाता है ऐसा सर्वज्ञदेवने वर्णन किया है ॥१०॥ यह व्यवहारकाल वर्तना लक्षणरूप निश्चय काल द्रव्यके द्वारा ही प्रवर्तित होता है और वह भूत, भविष्यत् तथा वर्तमान रूप होकर संसारका व्यवहार चलानेके लिए समर्थ होता है अथवा कल्पित किया जाता है ॥११॥ वह व्यवहारकाल समय आवलि उच्छ्वास नाड़ी आदिके भेदसे अनेक प्रकारका होता है। यह व्यवहारकाल सूर्यादि ज्योतिश्चक्रके घूमनेसे ही प्रकट होता है ऐसा विद्वान् लोग जानते हैं ॥१२॥ यदि भव आयु काय और शरीर आदिकी स्थितिका समय जोड़ा जावे तो वह अनन्त समयरूप होता है और उसका परिवर्तन भी अनन्त प्रकारसे होता है ॥१३॥

---

१ स्वरूपेण। २ अगुरुलघुगुणः। ३ जीवास्तिकायः। ४ संश्रयः। ५ मुख्यकालेन। ६ कल्पितः म०। ७-युः काय-ल०, अ०, म०, स०, प०, द०। ८ सङ्कल्पनात्मकः प०। ९-नन्तकः स०। १० वर्ष्म प्रमाणम्। "वर्ष्म देहप्रमाणयोः" इत्यमरः।

कोटीकोट्यो दशैकस्य [1]प्रमा सागरसंख्यया । शेषस्याप्येवमेवेष्टा तावुभौ कल्प इष्यते ॥१५॥
षोढा स पुनरेकैको भिद्यते स्वभिदात्मभिः । तन्नामान्यनुकीर्त्यन्ते शृणु राजन् यथाक्रमम् ॥१६॥
द्विरुक्तसुषमाद्यासीत् द्वितीया सुषमा मता । सुषमा दुःषमान्तान्या सुषमान्ता च दुःषमा ॥१७॥
पञ्चमी दुःषमा ज्ञेया [2]समा षष्ठ्यतिदुःषमा । भेदा इमेऽवसर्पिण्या उत्सर्पिण्या विपर्ययाः ॥१८॥
समा कालविभागः स्यात् सुदुसावर्हगर्हयोः । सुषमा दुःषमेत्येवमतोऽन्वर्थत्वमेतयोः ॥१९॥
उत्सर्पिण्यवसर्पिण्यौ कालौ सान्तर्भिदाविमौ । स्थित्युत्सर्पावसर्पाभ्यां लब्धान्वर्थाभिधानकौ ॥२०॥
कालचक्रपरिभ्रान्त्या षट्समापरिवर्तनैः । तावुभौ परिवर्तेते [3]तामिस्रेतरपक्षवत् ॥२१॥
पुराऽस्यामवसर्पिण्यां क्षेत्रेऽस्मिन्भरताह्वये । मध्यमं खण्डमाश्रित्य [4]वव्रृधे प्रथमा समा ॥२२॥
सागरोपमकोटीनां कोटी स्याच्चतुराहता । तस्य कालस्य परिमा तदा स्थितिरियं मता ॥२३॥
देवोत्तरकुरुक्ष्मासु या स्थितिः समवस्थिता । सा स्थितिर्भारते वर्षे युगारम्भे स्म जायते ॥२४॥

इस व्यवहारकालके दो भेद कहे जाते हैं–१ उत्सर्पिणी और २ अवसर्पिणी। जिसमें मनुष्योंके बल, आयु और शरीरका प्रमाण क्रम क्रमसे बढ़ता जावे उसे उत्सर्पिणी कहते हैं और जिसमें वे क्रम क्रमसे घटते जावें उसे अवसर्पिणी कहते हैं ॥१४॥ उत्सर्पिणी कालका प्रमाण दश कोड़ाकोड़ी सागर है तथा अवसर्पिणी कालका प्रमाण भी इतना ही है। इन दोनोंको मिलाकर बीस कोड़ाकोड़ी सागरका एक कल्प काल होता है ॥१५॥ हे राजन्, इन उत्सर्पिणी और अवसर्पिणी कालके प्रत्येकके छह छह भेद होते हैं। अब क्रमपूर्वक उनके नाम कहे जाते हैं सो सुनो ॥१६॥ अवसर्पिणी कालके छह भेद ये हैं–पहला सुषमासुषमा, दूसरा सुषमा, तीसरा सुषमा-दुःषमा, चौथा-दुःषमासुषमा, पाँचवाँ दुःषमा और छठवाँ अतिदुःषमा अथवा दुःषम दुःषमा ये अवसर्पिणीके भेद जानना चाहिये। उत्सर्पिणी कालके भी छह भेद होते हैं जो कि उक्त भेदोंसे विपरीत रूप हैं, जैसे १ दुःषमादुःषमा, २ दुःषमा, ३ दुःषमासुषमा, ४ सुषमादुःषमा, ५ सुषमा और ६ सुषमासुषमा ॥१७–१८॥ समा कालके विभागको कहते हैं तथा सु और दुर् उपसर्ग क्रमसे अच्छे और बुरे अर्थमें आते हैं। सु और दुर् उपसर्गोंको पृथक् पृथक् समाके साथ जोड़ देने तथा व्याकरणके नियमानुसार स को ष कर देनेसे सुषमा तथा दुःषमा शब्दोंकी सिद्धि होती है। जिनका अर्थ क्रमसे अच्छा काल और बुरा काल होता है, इस तरह उत्सर्पिणी और अवसर्पिणी कालके छहों भेद सार्थक नामवाले हैं ॥१९॥ इसी प्रकार अपने अवान्तर भेदोंसे सहित उत्सर्पिणी और अवसर्पिणी काल भी सार्थक नामसे युक्त हैं क्योंकि जिसमें स्थिति आदिकी वृद्धि होती रहे उसे उत्सर्पिणी और जिसमें घटती होती रहे उसे अवसर्पिणी कहते हैं ॥२०॥ ये उत्सर्पिणी और अवसर्पिणी नामक दोनों ही भेद कालचक्रके परिभ्रमणसे अपने छहों कालोंके साथ साथ कृष्णपक्ष और शुक्लपक्षकी तरह घूमते रहते हैं अर्थात् जिसतरह कृष्णपक्षके बाद शुक्लपक्ष और शुक्लपक्षके बाद कृष्णपक्ष बदलता रहता है उसीतरह अवसर्पिणीके बाद उत्सर्पिणी और उत्सर्पिणीके बाद अवसर्पिणी बदलती रहती है ॥२१॥

पहले इस भरतक्षेत्रके मध्यवर्ती आर्यखण्डमें अवसर्पिणीका पहला भेद सुषमा-सुषमा नामका काल वर्त रहा था उसकालका परिमाण चार कोड़ाकोड़ी सागर था उस समय यहाँ नीचे लिखे अनुसार व्यवस्था थी ॥२२–२३॥ देवकुरु और उत्तरकुरु नामक उत्तर भोगभूमियोंमें जैसी स्थिति रहती है ठीक वैसी ही स्थिति इस भरतक्षेत्रमें युगके

---

१ प्रमितिः। २ कालः। ३ तामिस्रेतरौ कृष्णशुक्लौ। ४ प्रथते स०, प०। वव्रृते द०, ट०। वव्रृते वर्तते स्म।

तदा स्थितिर्मनुष्याणां [1]त्रिपल्योपमसम्मिता । षट्सहस्राणि चापानामुत्सेधो वपुषः स्मृतः ॥२५॥
[2]वज्रास्थिबन्धनाः सौम्याः सुन्दराकारचारवः । निष्टप्तकनकच्छाया दीप्यन्ते ते नरोत्तमाः ॥२६॥
मुकुटं कुण्डलं हारो मेखला कटकाङ्गदौ । केयूरं ब्रह्मसूत्रञ्च तेषां शश्वद्विभूषणम् ॥२७॥
[3]ते स्वपुण्योदयोद्भूतरूपलावण्यसम्पदः । रंरम्यन्ते चिरं स्त्रीभिः सुरा इव सुरालये ॥२८॥
[4]महासत्त्वा महाधैर्या महोरस्का महौजसः । महानुभावास्ते सर्वे [5]महीयन्ते महोदयाः ॥२९॥
तेषामाहारसम्प्रीतिर्जायते दिवसैस्त्रिभिः । [6]कुवलीफलमात्रञ्च दिव्यान्नं [7]विस्वणन्ति ते ॥३०॥
[8]निर्व्यायामा निरातङ्का निर्णीहारा [9]निराधयः । निस्स्वेदास्ते [10]निराबाधा जीवन्ति [11]पुरुषायुषाः ॥३१॥
स्त्रियोऽपि तावदायुष्कास्तावदुत्सेधवृत्तयः । कल्पद्रुमेषु संसक्ता कल्पवल्ल्य इवोज्ज्वलाः ॥३२॥
पुरुषेष्वनुरक्तास्तास्ते च तास्वनुरागिणः । यावज्जीवमसंक्लिष्टा भुञ्जते भोगसम्पदः ॥३३॥
स्वभावसुन्दरं रूपं स्वभावमधुरं वचः । स्वभावचतुरा चेष्टा तेषां स्वर्गजुषामिव ॥३४॥
हृद्याहारगृहातोद्य-माल्यभूषाम्बरादिकम् । भोगसाधनमेतेषां सर्वं कल्पतरूद्भवम् ॥३५॥

प्रारम्भ–अर्थात् अवसर्पिणीके पहले कालमें थी ॥२४॥ उस समय मनुष्योंकी आयु तीन पल्यकी होती थी और शरीरकी ऊँचाई छह हजार धनुषकी थी ॥२५॥ उस समय यहाँ जो मनुष्य थे उनके शरीरके अस्थिबन्धन वज्रके समान सुदृढ़ थे, वे अत्यन्त सौम्य और सुन्दर आकारके धारक थे। उनका शरीर तपाये हुए सुवर्णके समान देदीप्यमान था ॥२६॥ मुकुट, कुण्डल, हार, करधनी, कड़ा, बाजूबन्द और यज्ञोपवीत इन आभूषणों को वे सर्वदा धारण किये रहते थे ॥२७॥ वहाँके मनुष्योंको पुण्यके उदयसे अनुपम रूप सौन्दर्य तथा अन्य सम्पदाओंकी प्राप्ति होती रहती है इसलिये वे स्वर्गमें देवोंके समान अपनी अपनी स्त्रियोंके साथ चिरकालतक क्रीड़ा करते रहते हैं ॥२८॥ वे पुरुष सबके सब बड़े बलवान्, बड़े धीरवीर, बड़े तेजस्वी, बड़े प्रतापी, बड़े सामर्थ्यवान् और बड़े पुण्यशाली होते हैं। उनके वक्षःस्थल बहुत ही विस्तृत होते हैं तथा वे सब पूज्य समझे जाते हैं ॥२९॥ उन्हें तीन दिन बाद भोजनकी इच्छा होती है सो कल्पवृक्षोंसे प्राप्त हुए बदरीफल बराबर उत्तम भोजन ग्रहण करते हैं ॥३०॥ उन्हें न तो कोई परिश्रम करना पड़ता है, न कोई रोग होता है, न मलमूत्रादिकी बाधा होती है, न मानसिक पीड़ा होती है, न पसीना ही आता है और न अकालमें उनकी मृत्यु ही होती है। वे बिना किसी बाधाके सुखपूर्वक जीवन बिताते हैं ॥३१॥ वहाँकी स्त्रियाँ भी उतनी ही आयुकी धारक होती हैं, उनका शरीर भी उतना ही ऊँचा होता है और वे अपने पुरुषोंके साथ ऐसी शोभायमान होती हैं जैसी कल्पवृक्षोंपर लगी हुई कल्पलताएँ ॥३२॥ वे स्त्रियाँ अपने पुरुषोंमें अनुरक्त रहती हैं और पुरुष अपनी स्त्रियोंमें अनुरक्त रहते हैं। वे दोनों ही अपने जीवन पर्यन्त बिना किसी क्लेशके भोग सम्पदाओंका उपभोग करते रहते हैं ॥३३॥ देवोंके समान उनका रूप स्वभावसे सुन्दर होता है, उनके वचन स्वभावसे मीठे होते हैं और उनकी चेष्टाएँ भी स्वभावसे चतुर होती हैं ॥३४॥ इच्छानुसार मनोहर आहार, घर, बाजे, माला, आभूषण और वस्त्र आदिक समस्त भोगोपभोगकी सामग्री

१ त्रिभिः पल्यैरुपमा यस्यासौ त्रिपल्योपमस्तेन सम्मिता । २ अस्थीनि च बन्धनानि च अस्थिबन्धनानि, वज्रवत् अस्थिबन्धनानि येषां ते । ३ एते पुण्ये–अ०,प०,स०,द०,ल० । ४ महौजसः । ५ महीङ वृद्धौ पूजायाम्, कण्ड्वादित्वाद् यक् । ६ बदरफलम् । ७ स्वन शब्दे । अश्नन्ति । 'वेश्च स्वनोऽशने' इत्यशनार्थे षत्वम् । ८ श्रमजनकगमनागमनादिव्यापाररहिताः । ९ निरामयाः स० । १० परकृतबाधारहिताः । निराबाधं अ०, ल० । ११ पुरुषायुषम् द०, प०, म० ।

मन्दगन्धवहाधूतवलदंशुकपल्लवाः[1] । नित्यालोका[2] विराजन्ते कल्पोपपदपादपाः ॥३६॥
कालानुभवसम्भूतक्षेत्रसामर्थ्यबृंहिताः । कल्पद्रुमास्तथा तेषां[3]कल्पन्तेऽभीष्टसिद्धये ॥३७॥
मनोभिरुचितान्[4] भोगान् यस्मात्पुण्यकृतां नृणाम् । कल्पयन्ति ततस्तज्ज्ञैर्निरुक्ताः कल्पपादपाः ॥३८॥
मद्यतूर्यविभूषास्रग्ज्योतिर्दीपगृहाङ्गकाः । भोजनाम[5]त्रवस्त्राङ्गा दशधा कल्पशाखिनः ॥३९॥
इति स्वनामनिर्दिष्टां कुर्वन्तोऽर्थक्रियाममी । संज्ञाभिरेव विस्पष्टा ततो नातिप्रतन्यते[6] ॥४०॥
तथा भुक्त्वा चिरं भोगान् स्वपुण्यपरिपाकजान् । स्वायुरन्ते विलीयन्ते ते घना इव शारदाः ॥४१॥
जृम्भिकारम्भमात्रेण तत्कालोत्थक्षुतेन वा । जीवितान्ते तनुं त्यक्त्वा ते दिवं यान्त्यनेनसः ॥४२॥
स्वभावमार्दवायोगवक्रतादिगुणैर्युताः । भद्रकास्त्रिदिवं यान्ति तेषां नान्या गतिस्ततः ॥४३॥
इत्याद्यः[7] कालभेदोऽवसर्पिण्यां वर्णितो मनाक् । उदक्कुरुसमः शेषो विधिरत्रावधार्यताम्[8] ॥४४॥
ततो यथाक्रमं तस्मिन् काले गलति मन्दताम् । यातासु वृक्षवीर्यायुःशरीरोत्सेधवृत्तिषु ॥४५॥
सुषमालक्षणः कालो द्वितीयः समवर्तत । सागरोपमकोटीनां तिस्रः कोट्योऽस्य संमितिः ॥४६॥
तदास्मिन्भारते वर्षे मध्यभोगभुवां[9] स्थितिः । जायते स्म परा भूतिं तन्वाना कल्पपादपैः ॥४७॥
तदा मर्त्या ह्यमर्त्याभा द्विपल्योपमजीविताः[10] । चतुःसहस्रचापोच्चविग्रहाः शुभचेष्टिताः ॥४८॥

इन्हें इच्छा करते ही कल्पवृक्षोंसे प्राप्त हो जाती है ॥३५॥ जिनके पल्लवरूपी वस्त्र मन्द सुगन्धित वायुके द्वारा हमेशा हिलते रहते हैं ऐसे सदा प्रकाशमान रहनेवाले वहाँके कल्पवृक्ष अत्यन्त शोभायमान रहते हैं ॥३६॥ सुषमासुषमा नामक कालके प्रभावसे उत्पन्न हुई क्षेत्रकी सामर्थ्यसे वृद्धिको प्राप्त हुए वे कल्पवृक्ष वहाँके जीवोंको मनोवांछित पदार्थ देनेके लिए सदा समर्थ रहते हैं ॥३७॥ वे कल्पवृक्ष पुण्यात्मा पुरुषोंको मनचाहे भोग देते रहते हैं इसलिए जानकार पुरुषोंने उनका 'कल्पवृक्ष' यह नाम सार्थक ही कहा है ॥३८॥ वे कल्पवृक्ष दश प्रकारके हैं–१ मद्याङ्ग, २ तूर्याङ्ग, ३ विभूषाङ्ग, ४ स्रगङ्ग (माल्याङ्ग), ५ ज्योतिरङ्ग, ६ दीपाङ्ग, ७ गृहाङ्ग, ८ भोजनाङ्ग, ९ पात्राङ्ग और १० वस्त्राङ्ग। ये सब अपने अपने नामके अनुसार ही कार्य करते हैं इसलिए इनके नाम मात्र कह दिए हैं अधिक विस्तारके साथ उनका कथन नहीं किया है ॥३९–४०॥ इस प्रकार वहाँके मनुष्य अपने पूर्व पुण्यके उदयसे चिरकालतक भोगोंको भोगकर आयु समाप्त होते ही शरद्ऋतुके मेघोंके समान विलीन हो जाते हैं ॥४१॥ आयुके अन्तमें पुरुषको जिम्हाई आती है और स्त्रीको छींक। उसीसे पुण्यात्मा पुरुष अपना अपना शरीर छोड़कर स्वर्ग चले जाते हैं ॥४२॥ उस समयके मनुष्य स्वभावसे ही कोमलपरिणामी होते हैं, इसलिए वे भद्रपुरुष मरकर स्वर्ग ही जाते हैं। स्वर्गके सिवाय उनकी और कोई गति नहीं होती ॥४३॥ इस प्रकार अवसर्पिणी कालके प्रथम सुषमासुषमा नामक कालका कुछ वर्णन किया है। यहाँकी और समस्त विधि उत्तरकुरुके समान समझना चाहिये ॥४४॥ इसके अनन्तर जब क्रम क्रमसे प्रथम काल पूर्ण हुआ और कल्पवृक्ष, मनुष्योंका बल, आयु तथा शरीरकी ऊँचाई आदि सब घटतीको प्राप्त हो चले तब सुषमा नामक दूसरा काल प्रवृत्त हुआ। इसका प्रमाण तीन कोड़ाकोड़ी सागर था ॥४५–४६॥ उस समय इस भारतवर्षमें कल्पवृक्षोंके द्वारा उत्कृष्ट विभूतिको विस्तृत करती हुई मध्यम भोगभूमिकी अवस्था प्रचलित हुई ॥४७॥ उस वक्त यहाँके मनुष्य देवोंके समान कान्तिके धारक

१ अंशुकं वस्त्रम्। २ नित्यप्रकाशाः। ३ समर्था भवन्ति। ४–भिलषितान् प०, म०, ल०। ५ अमत्रं भाजनम्। ६ प्रतन्वते अ०, प०, म०, द०। ७–द्यकाल–अ०, स०। ८–वधार्यते प०, म०। ९ भुवः म०, ल०। १० जीवितः अ०, स०।

कलाधरकलास्पर्द्धिदेहज्योत्स्नास्मितोज्ज्वलाः । दिनद्वयेन तेऽश्नन्ति [1]वार्क्षमन्धोऽक्षमात्रकम् ॥४९॥
शेषो विधिस्तु निश्शेषो हरिवर्षसमो मतः । ततः क्रमेण कालेऽस्मिन्नवसर्पत्यनुक्रमात् ॥५०॥
प्रहीणा वृक्षवीर्यादिविशेषाः प्राक्तना यदा । जघन्यभोगभूमीनां मर्यादाविरभूत्तदा ॥५१॥
यथावसरसम्प्राप्तस्तृतीयः कालपर्ययः । प्रावर्त्तत सुराजेव स्वां मर्यादामलङ्घयन् ॥५२॥
सागरोपमकोटीनां [2]कोट्यौ द्वे [3]लब्धसंस्थितौ । कालेऽस्मिन्भारते वर्षे मर्त्याः पल्योपमायुषः ॥५३॥
[4]गव्यूतिप्रमितोच्छ्रायाः [5]प्रियङ्गुश्यामविग्रहाः । दिनान्तरेण संप्राप्त[6]धात्रीफलमिताशनाः ॥५४॥
ततस्तृतीयकालेऽस्मिन् व्यतिक्रामत्यनुक्रमात् । पल्योपमाष्टभागस्तु यदास्मिन्परिशिष्यते ॥५५॥
कल्पानोकहवीर्याणां क्रमादेव परिच्युतौ । ज्योतिरङ्गास्तदा वृक्षा गता मन्दप्रकाशताम् ॥५६॥
[7]पुष्पदन्ता[8]वथाषाढ्यां पौर्णमास्यां स्फुरत्प्रभौ । [9]सायाह्ने प्रादुरास्तां तौ गगनोभयभागयोः ॥५७॥
चामीकरमयौ पोताविव तौ गगनार्णवे । वियद्गजस्य [10]निर्याण[11]लिखितौ तिलकाविव ॥५८॥
पौर्णमासीविलासिन्याः क्रीड्यमानौ समुज्ज्वलौ । परस्परकराश्लिष्टौ[12] [13]जातुषाविव गोलकौ ॥५९॥
जगद्गृहमहाद्वारि विन्यस्तौ कालभूभृतः । [14]प्रत्यग्रस्य प्रवेशाय कुम्भाविव हिरण्मयौ ॥६०॥

थे, उनकी आयु दो पल्यकी थी उनका शरीर चार हजार धनुष ऊँचा था तथा उनकी सभी चेष्टाएँ शुभ थीं ॥४८॥ उनके शरीरकी कान्ति चन्द्रमाकी कलाओंके साथ स्पर्धा करती थी अर्थात् उनसे भी कहीं अधिक सुन्दर थी, उनकी मुस्कान बड़ी ही उज्ज्वल थी। वे दो दिन बाद कल्पवृक्ष से प्राप्त हुए बहेड़ेके बराबर उत्तम अन्न खाते थे ॥४९॥ उस समय यहाँकी शेष सब व्यवस्था हरिक्षेत्र के समान थी फिर क्रमसे जब द्वितीय काल पूर्ण हो गया और कल्पवृक्ष तथा मनुष्योंके बल विक्रम आदि घट गये तब जघन्य भोगभूमि की व्यवस्था प्रकट हुई ॥५०–५१॥ उस समय न्यायवान् राजाके सदृश मर्यादाका उल्लंघन नहीं करता हुआ तीसरा सुषमादुःषमा नामका काल यथाक्रमसे प्रवृत्त हुआ ॥५२॥ उसकी स्थिति दो कोड़ाकोड़ी सागरकी थी। उस समय इस भारतवर्षमें मनुष्योंकी स्थिति एक पल्यकी थी। इनके शरीर एक कोश ऊँचे थे, वे प्रियङ्गुके समान श्यामवर्ण थे और एक दिनके अन्तरसे आँवलेके बराबर भोजन ग्रहण करते थे ॥५३–५४॥ इस प्रकार क्रम क्रमसे तीसरा काल व्यतीत होने पर जब इसमें पल्यका आठवाँ भाग शेष रह गया तब कल्पवृक्षोंकी सामर्थ्य घट गई और ज्योतिरङ्ग जातिके कल्पवृक्षोंका प्रकाश अत्यन्त मन्द हो गया ॥५५–५६॥ तदनन्तर किसी समय आषाढ़ सुदी पूर्णिमाके दिन सायंकालके समय आकाशके दोनों भागोंमें अर्थात् पूर्व दिशामें उदित होता हुआ चमकीला चन्द्रमा और पश्चिममें अस्त होता हुआ सूर्य दिखलाई पड़ा ॥५७॥ उस समय वे सूर्य और चन्द्रमा ऐसे शोभायमान हो रहे थे मानो आकाश रूपी समुद्रमें सोनेके बने हुए दो जहाज ही हों अथवा आकाश रूपी हस्तीके गण्डस्थलके समीप सिन्दूर से बने हुए दो चन्द्रक (गोलाकार चिह्न) ही हों। अथवा पूर्णिमा रूपी स्त्रीके दोनों हाथोंपर रखे हुए खेलनेके मनोहर लाखनिर्मित दो गोले ही हों। अथवा आगे होनेवाले दुःषम-सुषमा नामक काल रूपी नवीन राजाके प्रवेशके लिये जगत्-रूपी घरके विशाल दरवाजे पर रखे हुए मानो दो सुवर्ण कलश ही हों। अथवा तारारूपी फेन

१ वृक्षस्येदम्। २–नां द्वे कोट्यौ लब्ध–द०। कोट्यौ द्वौ लब्ध–अ०, म०, स०, ल०। ३ लब्धा सम्प्राप्ता। ४ क्रोशः। ५ कलिनी। ६ आमलकी। ७ सूर्याचन्द्रमसौ। पुष्पवन्ता–द०, स०, म०, ल०,। ८ आषाढमासे। ९ अपराह्णे। १० अपाङ्गदेशो निर्याणम्। ११–ण लक्षितौ अ०। –ण चन्द्रकाविव लक्षितौ द०, प०, म०, ल०। १२ आहवौ। १३ जतोर्विकारौ। १४ नूतनस्य।

ताराफेनग्रहग्राहवियत्सागरमध्यगौ । चामीकरमयौ दिव्यावम्भःक्रीडागृहाविव ॥६१॥
सद्वृत्तत्वादसङ्गत्वात् साधुवर्गानुकारिणौ । शीततीव्रकरत्वाच्च सदसद्भूमिपाविव ॥६२॥
प्रतिश्रुतिरिति ख्यातस्तदा कुलधरोऽग्रिमः । बिभ्रल्लोकातिगं तेजः प्रजानां नेत्रवद्बभौ ॥६३॥
पल्यस्य दशमो भागस्तस्यायुर्जिनदेशितम् । धनुःसहस्रमुत्सेधः शतैरधिकमष्टभिः ॥६४॥
जाज्वल्यमानमकुटो [1]लसन्मकरकुण्डलः । कनकाद्रिरिवोत्तुङ्गो बिभ्राणो हारनिर्झरम् ॥६५॥
नानाभरणभाभारभासुरोदारविग्रहः । प्रोत्सर्पत्तेजसा स्वेन निर्भर्त्सितविग्रहः ॥६६॥
महान् जगद्गृहोन्मानमानदण्ड इवोच्छ्रितः । दधज्जन्मान्तराभ्यासजनितं बोधमिद्धधीः ॥६७॥
स्फुरद्दन्तांशुसलिलैर्मुहुः प्रक्षालयन्दिशः । प्रजानां प्रीणनं वाक्यं [2]सौधं रसमिवोद्गिरन् ॥६८॥
अदृष्टपूर्वौ तौ दृष्ट्वा सभीतान् भोगभूमिजान् । भीतेर्निवर्त्तयामास तत्स्वरूपमिति ब्रुवन् ॥६९॥
एतौ तौ प्रतिदृश्येते सूर्याचन्द्रमसौ ग्रहौ । ज्योतिरङ्गप्रभापायात् कालह्रासवशोद्भवात् ॥७०॥
सदाप्यधिनभोभागं [3]भ्राम्यतोऽमू महाद्युति । न वाम्यां भयं किञ्चिदतो मा भैष्ट भद्रकाः ॥७१॥

और बुध मंगल आदि ग्रह रूपी मगरमच्छोंसे भरे हुए आकाश रूपी समुद्रके मध्यमें सुवर्णके दो मनोहर जलक्रीड़ागृह ही बने हों। अथवा सद्वृत्त–गोलाकार (पक्षमें सदाचारी) और असंग-अकेले (पक्षमें परिग्रहरहित) होनेके कारण साधुसमूहका अनुकरण कर रहे हों अथवा शीतकर–शीतल किरणों से युक्त (पक्षमें अल्प टेक्स लेने वाला) और तीव्रकर—उष्ण किरणोंसे युक्त (पक्षमें अधिक टेक्स लेने वाला) होनेके कारण क्रमसे न्यायी और अन्यायी राजा का ही अनुकरण कर रहे हों ॥५८-६२॥ उस समय वहाँ प्रतिश्रुति नामसे प्रसिद्ध पहले कुलकर विद्यमान थे जो कि सबसे अधिक तेजस्वी थे और प्रजाजनोंके नेत्रके समान शोभायमान थे अर्थात् नेत्रके समान प्रजाजनोंको हितकारी मार्ग बतलाते थे ॥६३॥ जिनेन्द्र देवने उनकी आयु पल्यके दशवें भाग और ऊँचाई एक हजार आठ सौ धनुष बतलाई है ॥६४॥ उनके मस्तक पर प्रकाशमान मुकुट शोभायमान हो रहा था, कानोंमें सुवर्णमय कुण्डल चमक रहे थे और वे स्वयं मेरु पर्वतके समान ऊँचे थे इसलिये उनके वक्षःस्थलपर पड़ा हुआ रत्नोंका हार झरनेके समान मालूम होता था। उनका उन्नत और श्रेष्ठ शरीर नाना प्रकारके आभूषणोंकी कान्तिके भारसे अतिशय प्रकाशमान हो रहा था, उन्होंने अपने बढ़ते हुए तेजसे सूर्यको भी तिरस्कृत कर दिया था। वे बहुत ही ऊँचे थे इसलिये ऐसे मालूम होते थे मानो जगत् रूपी घरकी ऊँचाईको नापनेके लिये खड़े किये गये मापदण्ड ही हों। इसके सिवाय वे जन्मान्तरके संस्कारसे प्राप्त हुए अवधिज्ञानको भी धारण किये हुए थे इसलिये वही सबमें उत्कृष्ट बुद्धिमान् गिने जाते थे ॥६५-६७॥ वे देदीप्यमान दांतोंकी किरणों रूपी जलसे दिशाओंका बार बार प्रक्षालन करते हुए जब प्रजाको संतुष्ट करने वाले वचन बोलते थे तब ऐसे मालूम होते थे मानो अमृतका रस ही प्रकट कर रहे हों। पहले कभी नहीं दिखने-वाले सूर्य और चन्द्रमाको देख कर भयभीत हुए भोगभूमिज मनुष्योंको उन्होंने उनका निम्न-लिखित स्वरूप बतला कर भयरहित किया था ॥६८–६९॥ उन्होंने कहा—हे भद्र पुरुषो, तुम्हें जो ये दिख रहे हैं वे सूर्य चन्द्रमा नामके ग्रह हैं, ये महाकान्तिके धारक हैं तथा आकाशमें सर्वदा घूमते रहते हैं। अभी तक इनका प्रकाश ज्योतिरङ्ग जाति के कल्प-

1 लसत्कनककुण्डलः द०, प०, म०, ल०। 2 सुधाया अयम्। 3 भ्रमतो म०, ल०। 4 तसंज्ञिते ताडपत्रपुस्तके कोष्ठकान्तर्गतः पाठो लेखकप्रमादात्प्रभ्रष्टोऽतः ब०, अ०, प०, ल०, म०, द०, द०, स० संज्ञित-पुस्तकेभ्यस्तत्पाठो गृहीतः।

इमे भद्रमृगाः पूर्वं [1]स्वादीयोभिस्तृणाङ्कुरैः । [2]रसायनरसैः पुष्टाः सरसां सलिलैरपि ॥९५॥
[3]अङ्काधिरोपणैर्हस्तलालनैरपि [4]सान्विताः । अस्माभिरति[5]विश्रब्धाः[6] संवसन्तोऽनुपद्रवाः ॥९६॥
इदानीं तु विना हेतोः शृङ्गैरभिभवन्ति नः । दंष्ट्राभिर्नखराग्रैश्च [7]बिभित्सन्ति च दारुणाः ॥९७॥
कोऽभ्युपायो महाभाग ब्रूहि नः क्षेमसाधनम्[8] । क्षेमङ्करो हि स भवान् जगतः क्षेमचिन्तनैः ॥९८॥
इति तद्वचनाज्जातसौहार्दो मनुरब्रवीत् । सत्यमेतत्तथापूर्वमिदानीं तु [9]भयावहाः ॥९९॥
तदिमे परिहर्तव्याः कालाद्विकृतिमागताः । कर्तव्यो नैषु विश्वासो [10]बाधाः कुर्वन्त्युपेक्षिताः ॥१००॥
इत्याकर्ण्य वचस्तस्य परिजहुस्तदा मृगान् । शृङ्गिणो दंष्ट्रिणः क्रूरान् शेषैः [11]संवासमाययुः ॥१०१॥
व्यतीयुषि ततः काले मनोरस्य व्यतिक्रमे । मन्वन्तरमसंख्येयाः समाकोटीर्विलङ्घ्य च ॥१०२॥
[12]अत्रान्तरे महोदग्रविग्रहो दोषविग्रहः । अग्रेसरः सतामासीन्मनुः क्षेमंधराह्वयः ॥१०३॥
[13]तुटिकाब्दमितं तस्य बभूवायुर्महात्मनः । शतानि सप्त चापानां सप्ततिः पञ्च चोच्छ्रितिः ॥१०४॥
यदा प्रबलतां याताः [14]पाकसत्त्वा महाक्रुधः । तदा [15]लकुटयष्ट्याद्यैः स रक्षाविधिमन्वशात् ॥१०५॥
क्षेमंधरं इति ख्यातिं प्रजानां क्षेमधारणात् । स दधे[16] पाकसत्त्वेभ्यो रक्षोपायानुशासनैः[17] ॥१०६॥

बिना किसी आश्चर्यके निश्चल बैठे हुए क्षेमंकर मनुके पास जाकर उनसे पूछने लगे ॥९४॥ हे देव, सिंह व्याघ्र आदि जो पशु पहले बड़े शान्त थे जो अत्यन्त स्वादिष्ट घास खाकर और तालाबोंका रसायनके समान रसीला पानी पीकर पुष्ट हुए थे जिन्हें हम लोग अपनी गोदीमें बैठाकर अपने हाथोंसे खिलाते थे हम, जिनपर अत्यन्त विश्वास करते थे और जो बिना किसी उपद्रवके हम लोगोंके साथ साथ रहा करते थे आज वे ही पशु बिना किसी कारण के हम लोगोंको सींगोंसे मारते हैं, दाढ़ों और नखोंसे हमें विदारण किया चाहते हैं और अत्यन्त भयङ्कर दीख पड़ते हैं। हे महाभाग, आप हमारा कल्याण करने वाला कोई उपाय बतलाइए। चूँकि आप सकल संसारका क्षेम-कल्याण सोचते रहते हैं इसलिए सच्चे क्षेमंकर हैं ॥९५-९८॥ इस प्रकार उन आर्योंके वचन सुनकर क्षेमंकर मनुको भी उनसे मित्रभाव उत्पन्न हो गया और वे कहने लगे कि आपका कहना ठीक है। ये पशु पहले वास्तवमें शान्त थे परन्तु अब भयंकर हो गए हैं इसलिए इन्हें छोड़ देना चाहिये। ये कालके दोषसे विकारको प्राप्त हुए हैं अब इनका विश्वास नहीं करना चाहिये। यदि तुम इनकी उपेक्षा करोगे तो ये अवश्य ही बाधा करेंगे ॥९९-१००॥ क्षेमंकरके उक्त वचन सुनकर उन लोगोंने सींगवाले और दाढ़वाले दुष्ट पशुओंका साथ छोड़ दिया, केवल निरुपद्रवी गाय भैंस आदि पशुओंके साथ रहने लगे ॥१०१॥ क्रम क्रमसे समय बीतनेपर क्षेमङ्कर मनुकी आयु पूर्ण हो गई। उसके बाद जब असंख्यात करोड़ वर्षोंका मन्वन्तर व्यतीत हो गया तब अत्यन्त ऊँचे शरीरके धारक, दोषोंका निग्रह करनेवाले और सज्जनोंमें अग्रसर क्षेमंकर नामक चौथे मनु हुए। उन महात्माकी आयु तुटिक प्रमाण वर्षोंकी थी और शरीरकी ऊँचाई सात सौ पचहत्तर धनुष थी। इनके समयमें जब सिंह व्याघ्र आदि दुष्ट पशु अतिशय प्रबल और क्रोधी हो गए तब इन्होंने लकड़ी लाठी आदि उपायोंसे इनसे बचनेका उपदेश दिया। चूँकि इन्होंने दुष्ट जीवोंसे रक्षा करनेके उपायोंका उपदेश

१ अत्यर्थं स्वादुभिः । २ रसायनवत्स्वादुभिः । ३ अङ्कः उत्सङ्गः । ४ सामनीताः । ५-भिरिति म०, ल० । ६ विश्वासिताः । ७ भेत्तुमिच्छन्ति । ८ साधने ल० । ९ भयङ्कराः । १० बाधां अ०,प०,म०,स०,द०,ल ११ सहवासम् । १२ तत्रान्तरे अ०,प०,स०,द०,म०,ल० । १३ पञ्चचत्वारिंशत् शून्याधिकं षोडशप्रमित चतुर्दशप्रमाणचतुरशीतिसंगुणनं तुटिकाब्दप्रमाणम् । १४ क्रूरमृगाः । १५ 'यष्टिः स्यात्सप्तपर्विका' । १६ दध्रे अ०, प०, स०, म०, ल० । १७-शासनात् अ०, प०, द०, म०, ल० ।

पुनर्मन्वन्तरं तत्र संजातं पूर्ववत्क्रमात् । मनुः सीमंकरो जज्ञे प्रजानां पुण्यपाकतः ॥१०७॥
स चित्रवस्त्रमाल्यादिभूषितं वपुरुद्वहन् । सुरेन्द्रः स्वर्गलक्ष्म्येव भोगलक्ष्म्योपलालितः ॥१०८॥
[1]कमलप्रमितं तस्य प्राहुरायुर्महाधियः । शतानि सप्त पञ्चाशदुच्छ्रायो धनुषां मतः ॥१०९॥
कल्पाङ्घ्रिपा यदा जाता विरला मन्दकाः फलैः । तदा तेषु विसंवादो बभूवैषां परस्परम् ॥११०॥
ततो मनुरसौ मत्वा वाचा सीमविधिं व्यधात् । अतः सीमंकराख्यां तैर्लम्भितो[2]ऽन्वर्थतां गताम् ॥१११॥
पुनर्मन्वन्तरं प्राग्वदतिलङ्घ्य महोदयः । मनुः सीमंधरो नाम्ना समजायत पुण्यधीः ॥११२॥
[3]नलिनप्रमितायुष्को नलिनास्येक्षणद्युतिः । धनुषां पञ्चविंशाग्रमुच्छ्रितः शतसप्तकम् ॥११३॥
अत्यन्तविरला जाताः क्ष्माजा मन्दफला यदा । नृणां महान्विसंवादः केशाकेशि तदावृधत्[4] ॥११४॥
क्षेमवृत्तिं ततस्तेषां मन्वानः स मनुस्तदा । सीमानि तरुगुल्मादिचिह्नितान्यकरोत्कृती ॥११५॥
ततोऽन्तरमभूद् भूयोऽप्यसंख्या वर्षकोटयः । हीयमानेषु सर्वेषु नियोगेष्वनुपूर्वशः ॥११६॥
तदन्तरव्यतिक्रान्तावभूद्विमलवाहनः । मनूनां सप्तमो भोगलक्ष्म्यालिङ्गितविग्रहः ॥११७॥
[5]पद्मप्रमितमस्यायुः पद्माश्लिष्टतनोरभूत् । धनुःशतानि सप्तैव तनूत्सेधोऽस्य वर्णितः ॥११८॥

देकर प्रजाका कल्याण किया था इसलिए इनका क्षेमंधर यह सार्थक नाम प्रसिद्ध हुआ था ॥१०२-१०६॥ इनके बाद पहलेकी भाँति फिर भी असंख्यात करोड़ वर्षोंका मन्वन्तर पड़ा । फिर क्रमसे प्रजाके पुण्योदयसे सीमंकर नामके कुलकर उत्पन्न हुए । इनका शरीर चित्र विचित्र वस्त्रों तथा माला आदिसे शोभायमान था । जैसे इन्द्र स्वर्गकी लक्ष्मीका उपभोग करता है वैसे ही यह भी अनेक प्रकारकी भोग लक्ष्मीका उपभोग करते थे । महाबुद्धिमान् आचार्योंने उनकी आयु कमल प्रमाण वर्षोंकी बतलाई है तथा शरीरकी ऊँचाई सात सौ पचास धनुषकी । इनके समयमें जब कल्प वृक्ष अल्प रह गये और फल भी अल्प देने लगे तथा इसी कारण से जब लोगोंमें विवाद होने लगा तब सीमंकर मनुने सोच विचार कर वचनों द्वारा कल्पवृक्षोंकी सीमा नियत कर दी अर्थात् इस प्रकारकी व्यवस्था कर दी कि इस जगहके कल्पवृक्षसे इतने लोग काम लें और उस जगहके कल्प वृक्षसे उतने लोग काम लें । प्रजाने उक्त व्यवस्था से ही उन मनुका सीमंकर यह सार्थक नाम रख लिया था ॥१०७-१११॥ इनके बाद पहलेकी भाँति मन्वन्तर व्यतीत होनेपर सीमन्धर नामके छठवें मनु उत्पन्न हुए । उनकी बुद्धि बहुत ही पवित्र थी । वह नलिन प्रमाण आयुके धारक थे, उनके मुख और नेत्रोंकी कान्ति कमलके समान थी तथा शरीरकी ऊँचाई सात सौ पच्चीस धनुषकी थी । इनके समयमें जब कल्प वृक्ष अत्यन्त थोड़े रह गये तथा फल भी बहुत थोड़े देने लगे और उस कारणसे जब लोगोंमें भारी कलह होने लगा, कलह ही नहीं, एक दूसरेको बाल पकड़ पकड़ कर मारने लगे तब उन सीमन्धर मनुने कल्याण स्थापनाकी भावनासे कल्पवृक्षोंकी सीमाओंको अन्य अनेक वृक्ष तथा छोटी छोटी झाड़ियोंसे चिह्नित कर दिया था ॥११२-११५॥ इनके बाद फिर असंख्यात करोड़ वर्षोंका अन्तर हुआ और कल्प वृक्षोंकी शक्ति आदि हर एक उत्तम वस्तुओंमें क्रम क्रमसे घटती होने लगी तब मन्वन्तरको व्यतीत कर विमलवाहन नामके सातवें मनु हुए । उनका शरीर भोगलक्ष्मीसे आलिङ्गित था, उनकी आयु पद्म प्रमाण वर्षोंकी थी ।

१ चत्वारिंशच्छून्याधिकं चतुर्दशप्रमाणचतुरशीतिसंगुणनं कमलवर्षप्रमाणम् । २ प्रापितः । ३ पञ्चत्रिंशत् शून्याग्रं द्वादशप्रमितचतुरशीतिसंगुणनं नलिनवर्षप्रमाणम् । ४ 'वृधूङ् वृद्धौ' द्युतादित्वात् 'द्युद्भ्यो लुङि' इति सूत्रेण लुङि परस्मैपदमपि । ५ त्रिंशच्छून्याधिको दशप्रमाणचतुरशीतिसंवर्गः पद्मवर्षप्रमाणम् ।

[1]तदुपज्ञं गजादीनां बभूवारोहणक्रमः। [2]कुथाराङ्कुशपर्याणमुखभाण्डाद्युपक्रमैः ॥११९॥
पुनरन्तरमत्राभूदसंख्येयाब्दकोटयः। ततोऽष्टमो मनुर्जातश्चक्षुष्मानिति शब्दितः ॥१२०॥
[3]पद्माङ्गप्रमितायुष्कश्चापानां पञ्चसप्ततिः। षट्[4]छतान्यप्युदग्रश्रीरुच्छ्रिताङ्गो बभूव सः ॥१२१॥
तस्य कालेऽभवत्तेषां क्षणं पुत्रमुखेक्षणम्। अदृष्टपूर्वमार्याणां महदुत्त्रासकारणम् ॥१२२॥
ततः सपदि सञ्जातसाध्वसानार्यकांस्तदा। याथात्म्योपदेशेन स संत्रासमथोज्झयत् ॥१२३॥
चक्षुष्मानिति तेनाभूत् तत्काले ते यतोऽर्भकाः। [5]जनयित्रोः क्षणं जाताश्चक्षुर्दर्शनगोचरम् ॥१२४॥
पुनरप्यन्तरं तावद्वर्षकोटीर्विलङ्घ्य सः। यशस्वानित्यभून्नाम्ना यशस्वी नवमो मनुः ॥१२५॥
[6]कुमुदप्रमितं तस्य परमायुर्महीयसः। षट्छतानि च पञ्चाशद्धनूंषि [7]वपुरुच्छ्रितिः ॥१२६॥
तस्य काले प्रजा [8]जन्यमुखालोकपुरस्सरम्। कृताशिषः क्षणं स्थित्वा लोकान्तरमुपागमन् ॥१२७॥
यशस्वानित्यभूत्तेन शशंसुस्तद्यशो यतः। प्रजाः [10]सुप्रजसः प्रीताः [11]पुत्राशासनदेशनात् ॥१२८॥
ततोऽन्तरमतिक्रम्य तत्प्रायोग्याब्दसंमितम्। अभिचन्द्रोऽभवन्नाम्ना चन्द्रसौम्याननो मनुः ॥१२९॥
[12]कुमुदाङ्गमितायुष्को[13] ज्वलन्मुकुटकुण्डलः। पञ्चवर्गाग्रषट्चापशतोत्सेधः स्फुरत्तनुः ॥१३०॥

शरीर सात सौ धनुष ऊँचा और लक्ष्मीसे विभूषित था। इन्होंने हाथी घोड़ा आदि सवारीके योग्य पशुओं पर कुथार, अंकुश, पलान, तोबरा आदि लगाकर सवारी करनेका उपदेश दिया था ॥११६-११६॥ इनके बाद असंख्यात करोड़ वर्षोंका अन्तराल रहा। फिर चक्षुष्मान् नामके आठवें मनु उत्पन्न हुए, वे पद्माङ्ग प्रमाण आयुके धारक थे और छह सौ पचहत्तर धनुष ऊँचे थे। उनके शरीरकी शोभा बड़ी ही सुन्दर थी। इनके समयसे पहलेके लोग अपनी संतानका मुख नहीं देख पाते थे, उत्पन्न होते ही माता पिताकी मृत्यु हो जाती थी परन्तु अब वे क्षण भर पुत्रका मुख देखकर मरने लगे। उनके लिये यह नई बात थी इसलिये भयका कारण हुई। उस समय भयभीत हुए आर्य पुरुषोंको चक्षुष्मान् मनुने यथार्थ उपदेश देकर उनका भय छुड़ाया था। चूँकि उनके समय माता पिता अपने पुत्रोंको क्षणभर देख सके थे इसलिये उनका चक्षुष्मान् यह सार्थक नाम प्रसिद्ध हुआ ॥१२०-१२४॥ तदनन्तर करोड़ों वर्षोंका अन्तर व्यतीत कर यशस्वान् नामके नौवें मनु हुए। वे बड़े ही यशस्वी थे। उन महापुरुषकी आयु कुमुद प्रमाण वर्षोंकी थी। उनके शरीरकी ऊँचाई छह सौ पचास धनुषकी थी। उनके समयमें प्रजा अपनी सन्तानोंका मुख देखनेके साथ साथ उन्हें आशीर्वाद देकर तथा क्षणभर ठहर कर परलोक गमन करती थी-मृत्युको प्राप्त होती थी। इनके उपदेशसे प्रजा अपनी सन्तानोंको आशीर्वाद देने लगी थी इसलिये उत्तम सन्तान वाली प्रजाने प्रसन्न होकर इनका यश वर्णन किया इसी कारण इनका यशस्वान् यह सार्थक नाम पड़ गया था ॥१२५-१२८॥ इनके बाद करोड़ों वर्षोंका अन्तर व्यतीत कर अभिचन्द्र नामके दशवें मनु उत्पन्न हुए। उनका मुख चन्द्रमाके समान सौम्य था, कुमुदाङ्ग प्रमाण उनकी आयु थी, उनका मुकुट और कुण्डल अतिशय देदीप्यमान था। वे छह सौ पच्चीस धनुष ऊँचे तथा देदीप्यमान

---

१ तस्य प्रथमोपदेशः आदातुकमोपज्ञमिति नपुंसकत्वम्। २ कुठाराङ्कुश-अ०, प०, म०, ल०। कुथश्चाङ्कुश-द०। ३ पञ्चविंशतिशून्याग्रा नवप्रमाणचतुरशीतिहतिर्हि पद्माङ्गवर्षप्रमाणम्। ४ तद्शतान्य-अ०, द०, स०। ५ जननीजनकयोः। ६ पञ्चविंशतिशून्यप्रमष्टप्रमाणचतुरशीतिसंगुणनं कुमुदवर्षप्रमाणम्। ७-षि च तनूच्छ्रितिः द०, प०, म०, ल०। ८ जन्यः पुत्रः। ९ कारणेन। १० शोभनाः प्रजाः पुत्रा यासां ताः सुप्रजसः। 'नञ्दुस्सोः सक्थिः हलेर्वाम्' इत्यनुवर्तमाने 'अस्प्रजायाः' इति समासान्तः। ११ आशासनम् आशीर्वचनम्। १२ विंशतिशून्याधिका सप्तप्रमितिचतुरशीतिहतिः कुमुदाङ्गवर्षप्रमाणम्। १३-ङ्गप्रमायु-अ०, स०, द०, म०, प०, ल०।

कल्पद्रुम इवोत्तुङ्गफलशाली[1] महाद्युतिः । स बभार यथास्थानं नानाभरणमञ्जरीः ॥१३१॥
तस्य काले प्रजास्तोकमुखं वीक्ष्य सकौतुकम् । आशास्याक्रीडनं चक्रुर्निशि चन्द्राभिदर्शनैः ॥१३२॥
ततोऽभिचन्द्र इत्यासीद्यतश्चन्द्रमभिस्थिताः । पुत्रानाक्रीडयामासुस्तत्काले तन्मताज्जनाः ॥१३३॥
पुनरन्तरमुल्लङ्घ्य तत्प्रायोग्यसमाशतैः[3] । चन्द्राभ इत्यभूत्ख्यातश्चन्द्रास्यः कालविन्मनुः ॥१३४॥
[4]नयुतप्रमितायुष्को विलसल्लक्षणोज्ज्वलः । धनुषां षट्शतान्युच्चः[5] प्रोद्यदर्कसमद्युतिः ॥१३५॥
स [6]पुष्कलाः कला बिभ्रदुदितो [7]जगतां प्रियः । स्मितज्योत्स्नाभिराह्लादं शशीव समजीजनत् ॥१३६॥
तस्य कालेऽतिसंप्रीताः पुत्राशासनदर्शनैः । [8]तुग्भिः सह स्म जीवन्ति दिनानि कतिचित्प्रजाः ॥१३७॥
ततो लोकान्तरप्राप्तिमभजन्त यथासुखम् । स तदाह्लादनादासीच्चन्द्राभ इति विश्रुतः ॥१३८॥
मरुद्देवोऽभवत्कान्तः [9]कुलधृत्तदनन्तरम्[10] । स्वोचितान्तरमुल्लङ्घ्य प्रजानामुत्सवो दृशाम् ॥१३९॥
शतानि पञ्च [11]पञ्चाग्रां सप्ततिञ्च समुच्छ्रितः[12] । धनूंषि [13]नयुताङ्गायुर्विवस्वानिव भास्वरः ॥१४०॥

शरीरके धारक थे। यथायोग्य अवयवोंमें अनेक प्रकारके आभूषण रूप मंजरियोंको धारण किये हुए थे। उनका शरीर महाकान्तिमान् था और स्वयं पुण्यके फलसे शोभायमान थे इसलिये फूले फले तथा ऊँचे कल्पवृक्षके समान शोभायमान होते थे। उनके समय प्रजा अपनी अपनी सन्तानोंका मुख देखने लगी—उन्हें आशीर्वाद देने लगी तथा रातके समय कौतुकके साथ चन्द्रमा दिखला दिखला कर उनके साथ कुछ क्रीड़ा भी करने लगी। उस समय प्रजाने उनके उपदेशसे चन्द्रमाके सम्मुख खड़ा होकर अपनी सन्तानोंको क्रीड़ा कराई थी—उन्हें खिलाया था इसलिये उनका अभिचन्द्र यह सार्थक नाम प्रसिद्ध हुआ था ॥१२९–१३३॥ फिर उतना ही अन्तर व्यतीत कर चन्द्राभ नामके ग्यारहवें मनु हुए। उनका मुख चन्द्रमाके समान था, ये समयकी गतिविधिके जाननेवाले थे। इनकी आयु नयुत प्रमाण वर्षोंकी थी। ये अनेक शोभायमान सामुद्रिक लक्षणोंसे उज्ज्वल थे। इनका शरीर छह सौ धनुष ऊँचा था तथा उदय होते हुए सूर्यके समान देदीप्यमान था। ये समस्त कलाओं—विद्याओंको धारणा किए हुए ही उत्पन्न हुए थे, जनताको अतिशय प्रिय थे, तथा अपनी मन्द मुस्कानसे सबको आह्लादित करते थे इसलिए उदित होते ही सोलह कलाओंको धारण करनेवाले लोकप्रिय और चन्द्रिकासे युक्त चन्द्रमाके समान शोभायमान होते थे। इनके समयमें प्रजाजन अपनी सन्तानोंको आशीर्वाद देकर अत्यन्त प्रसन्न तो होते ही थे, परन्तु कुछ दिनों तक उनके साथ जीवित भी रहने लगे थे, बाद सुखपूर्वक परलोकको प्राप्त होते थे। उन्होंने चन्द्रमाके समान सब जीवोंको आह्लादित किया था इसलिए उनका चन्द्राभ यह सार्थक नाम प्रसिद्ध हुआ था ॥१३४–१३८॥ तदनन्तर अपने योग्य अन्तरको व्यतीत कर प्रजाके नेत्रोंको आनन्द देनेवाले, मनोहर शरीरके धारक मरुद्देव नामके बारहवें कुलकर उत्पन्न हुए। उनके शरीरकी ऊँचाई पाँच सौ पचहत्तर धनुषकी थी और आयु नयुत प्रमाण वर्षोंकी थी। वे सूर्यके समान देदीप्यमान थे अथवा वह स्वयं ही एक विलक्षण सूर्य थे, क्योंकि सूर्यके समान तेजस्वी होने पर भी लोग उन्हें सुखपूर्वक देख सकते थे जब कि चकाचौंधके कारण सूर्यको कोई देख नहीं सकता। सूर्यके समान उदय होनेपर भी वे कभी अस्त नहीं होते थे—उनका कभी परा-

१ –शालो स०, ल० । २ तोकः पुत्रः । ३ संवत्सरशतैः । ४ विंशतिशून्याग्रं षट्प्रमितचतुरशीतिसंगुणनं नयुतवर्षप्रमाणम् । ५ षट्शतान्युच्चैः अ०, प०, स०, द०, ल० । ६ पुष्कलाः (पूर्णाः) । ७ जनताप्रियः अ०, प०, म०, स०, द०, ल० । ८ पुत्रैः । ९ कुलभृत्त–द०, प०, म० । कुलकृत्त–अ०, स० । १०–नन्तरः प० । ११ पञ्चाग्रसप्ततिश्च अ० । १२ समुच्छ्रितिः म०, ल० । १३ पञ्चदशशून्याधिकपञ्चमितिचतुरशीतिसंवर्गा नयुताङ्गवर्षप्रमा ।

स तेजस्वी सुखालोकः सोदयोऽनस्तसंगतिः । [1]भूमिष्ठोऽप्यम्बरोद्भासी भास्वानिव[2] विलक्षणः ॥१४१॥
तस्य काले प्रजा दीर्घं [3]प्रजाभिः स्वाभिरन्विताः । [4]प्राणिपुस्तन्मुखालोकतदङ्गस्पर्शनोत्सवैः ॥१४२॥
स [5]तदुच्छ्वसितं यस्मात् तदायत्तस्वजीविकाः । प्रजा जीवन्ति तेनाभिर्मरुद्देव इतीरितः ॥१४३॥
नौद्रोणीसंक्रमादीनि जलदुर्गेष्वकारयत् । गिरिदुर्गेषु सोपानपद्धतीः सोऽधिरोहणे ॥१४४॥
तस्यैव काले [6]कुत्शैलाः कुसमुद्राः कुनिम्नगाः । जाताः सासारमेघाश्च [7]किंराजान इवास्थिराः ॥१४५॥
ततः प्रसेनजिज्जज्ञे प्रभविष्णुर्मनुर्महान् । कर्मभूमिस्थितावेवमभ्यर्णायां[8] शनैः शनैः ॥१४६॥
[9]पर्वप्रमितमाम्नातं मनोरस्यायुरञ्जसा । शतानि पञ्चचापानां शतार्द्धञ्च तदुच्छ्रितिः ॥१४७॥
प्रजानामधिकं चक्षुस्तमोदोषैरविप्लुतः[10] । सोऽभाद्रविरिवाभ्युद्यन्[11] [12]पद्माकरपरिग्रहात् ॥१४८॥
तदाभूदर्भकोत्पत्तिर्जरायुपटलावृता । ततस्तत्कर्षणोपायं[13] स प्रजानामुपादिशत् ॥१४९॥
तनुसंवरणं यत्तज्जरायुपटलं नृणाम् । स प्रसेनो जयात्तस्य प्रसेनजिदसौ स्मृतः ॥१५०॥

भव नहीं होता था जब कि सूर्य अस्त हो जाता है और जमीनमें स्थित रहते हुए भी वे आकाशको प्रकाशित करते थे जब कि सूर्य आकाशमें स्थित रहकर ही उसे प्रकाशित करता है (पक्षमें वस्त्रोंसे शोभायमान थे)। इनके समयमें प्रजा अपनी अपनी सन्तानोंके साथ बहुत दिनोंतक जीवित रहने लगी थीं तथा उनके मुख देखकर और शरीरको स्पर्श कर सुखी होती थी। वे मरुद्देव ही वहाँके लोगोंके प्राण थे क्योंकि उनका जीवन मरुद्देवके ही आधीन था अथवा यों समझिये—वे उनके द्वारा ही जीवित रहते थे इसलिए प्रजाने उन्हें मरुद्देव इस सार्थक नामसे पुकारा था। इन्हीं मरुद्देवने उस समय जलरूप दुर्गम स्थानोंमें गमन करनेके लिए छोटी बड़ी नाव चलानेका उपदेश दिया था तथा पहाड़ रूप दुर्गम स्थानपर चढ़नेके लिए इन्होंने सीढ़ियाँ बनवाईं थीं। इन्हींके समयमें अनेक छोटे छोटे पहाड़, उपसमुद्र तथा छोटी छोटी नदियाँ उत्पन्न हुई थीं तथा नीच राजाओंके समान अस्थिर रहनेवाले मेघ भी जब कभी वर्षने लगे थे ॥१३६–१४५॥ इनके बाद समय व्यतीत होनेपर जब कर्मभूमिकी स्थिति धीरे धीरे समीप आ रही थी—अर्थात् कर्मभूमिकी रचना होनेके लिए जब थोड़ा ही समय बाकी रह गया था तब बड़े प्रभावशाली प्रसेनजित् नामके तेरहवें कुलकर उत्पन्न हुए। इनकी आयु एक पर्व प्रमाण थी और शरीरकी ऊँचाई पाँचसौ पचास धनुषकी थी। वे प्रसेनजित् महाराज मार्ग-प्रदर्शन करनेके लिये प्रजाके तीसरे नेत्रके समान थे, अज्ञानरूपी दोषसे रहित थे और उदय होते ही पद्मा—लक्ष्मीके करग्रहणसे अतिशय शोभायमान थे, इन सब बातोंसे वे सूर्यके समान मालूम होते थे क्योंकि सूर्य भी मार्ग दिखानेके लिये तीसरे नेत्रके समान होता है, अन्धकारसे रहित होता है और उदय होते ही कमलोंके समूहको आनन्दित करता है। इनके समयमें बालकोंकी उत्पत्ति जरायुसे लिपटी हुई होने लगी अर्थात् उत्पन्न हुए बालकोंके शरीरपर मांसकी एक पतली झिल्ली रहने लगी। इन्होंने अपनी प्रजाको उस जरायुके खींचने अथवा फाड़ने आदिका उपदेश दिया था। मनुष्योंके शरीरपर जो आवरण होता है उसे जरायुपटल अथवा प्रसेन कहते हैं। तेरहवें मनुने उसे जीतने-दूर करने आदिका उपदेश दिया था इसलिये

१ भूमिस्थो द०, प०, म०, ल०। २ –स्वानतिवि–ब०, अ०। –स्वानिति वि-द०, प०, ल०। ३ पुत्रैः। ४ जीवन्ति स्म। ५ तासां प्रजानामुच्छ्वासः प्राण इत्यर्थः। ६ कुत्कीलाः अ०, द०, प०, स०। कुत्स्शैलाः म०, ल०। ७ कुत्सितभूपाः। ८ समीपस्थायाम्। ९ पञ्चदशशून्याग्रं चतुःप्रमाणचतुरशीतिसंगुणनं पर्ववर्षप्रमाणम्। १० अनुपद्रुतः। ११–भ्युद्यत् स०, म०, ल०। १२ पद्मायाः लक्ष्म्याः करा हस्ताः, पक्षे पद्मानां कमलानाम् आकरः समूहः। १३ कर्षणं छेदनम्।

प्रसा-प्रसूतिः संरोधादिनस्तस्याः प्रसेवकः । [1]तद्धानोपायकथनात् तज्जयाद्वा प्रसेनजित् ॥१५१॥
तदनन्तरमेवाभून्नाभिः कुलधरः सुधीः । युगादिपुरुषैः पूर्वैरुढां धुरमुद्वहन् ॥१५२॥
पूर्वकोटीमितं तस्य परमायुस्तदुच्छ्रितिः[2] । शतानि पञ्च चापानां पञ्चवर्गाधिकानि वै ॥१५३॥
मुकुटोद्भासिमूर्द्धासौ कुण्डलाभ्यामलङ्कृतः । सुमेरुरिव चन्द्रार्कसंश्लिष्टाधित्यको[3] बभौ ॥१५४॥
पार्वणं शशिनं गर्वात् स्खलयत्तन्मुखाम्बुजम् । स्मितोल्लसितदन्तांशुकेसरं भृशमाबभौ ॥१५५॥
स हारभूषितं वक्षो बभाराभरणोज्ज्वलः[4] । हिमवानिव गङ्गाम्बुप्रवाहघटितं तटम् ॥१५६॥
सदङ्गुलितलौ बाहू सोऽधान्नागाविवोत्फणौ । केयूररुचिरावंसौ[5] साही निधिघटाविव ॥१५७॥
[6]सुसंहतं दधौ मध्यं स्थेयो[7] वज्रास्थिबन्धनम् । लोकस्कन्ध इवोर्ध्वाधोविस्तृतश्चारुनाभिकम् ॥१५८॥
कटीतटं कटीसूत्रघटितं स बिभर्त्ति सः । रत्नद्वीपमिवाम्भोधिः पर्यन्तस्थितरत्नकम् ॥१५९॥
वज्रसारौ दधावूरू परिवृत्तौ सुसंहतौ । जगद्गृहान्तर्विन्यस्तसुस्थितस्तम्भसन्निभौ ॥१६०॥

वे प्रसेनजित् कहलाते थे । अथवा प्रसा शब्दका अर्थ प्रसूति–जन्म लेना है तथा इन शब्दका अर्थ स्वामी होता है जरायु उत्पत्तिको रोक लेती है अतः उसीको प्रसेन–जन्मका स्वामी कहते हैं (प्रसा+इन=प्रसेन) इन्होंने उस प्रसेनके नष्ट करने अथवा जीतनेके उपाय बतलाये थे इसलिये इनका प्रसेनजित् नाम पड़ा था ॥१४६–१५१॥ इनके बाद ही नाभिराज नामके कुलकर हुए थे, ये महाबुद्धिमान् थे । इनसे पूर्ववर्ती युग-श्रेष्ठ कुलकरोंने जिस लोकव्यवस्थाके भारको धारण किया था यह भी उसे अच्छी तरह धारण किये हुए थे । उनकी आयु एक करोड़ पूर्वकी थी और शरीरकी ऊँचाई पाँच सौ पच्चीस धनुष थी । इनका मस्तक मुकुटसे शोभायमान था और दोनों कान कुण्डलोंसे अलंकृत थे इसलिए वे नाभिराज उस मेरु पर्वतके समान शोभायमान हो रहे थे जिसका ऊपरी भाग दोनों तरफ घूमते हुए सूर्य और चन्द्रमासे शोभायमान हो रहा है । उनका मुखकमल अपने सौन्दर्यसे गर्वपूर्वक पौर्णमासीके चन्द्रमाका तिरस्कार कर रहा था तथा मन्द मुसकानसे जो दाँतोंकी किरणें निकल रहीं थी वे उसमें केसर की भाँति शोभायमान हो रही थीं । जिस प्रकार हिमवान् पर्वत गङ्गाके जल-प्रवाहसे युक्त अपने तटको धारण करता है उसी प्रकार नाभिराज अनेक आभरणोंसे उज्ज्वल और रत्नहारसे भूषित अपने वक्षःस्थलको धारण कर रहे थे । वे उत्तम अँगुलियों और हथेलियोंसे युक्त जिन दो भुजाओंको धारण किये हुए थे वे ऊपरको फण उठाये हुए सर्पोंके समान शोभायमान हो रहे थे । तथा बाजूबन्दोंसे सुशोभित उनके दोनों कन्धे ऐसे मालूम होते थे मानो सर्पसहित निधियोंके दो घड़े ही हों । वे नाभिराज जिस कटि भागको धारण किये हुए थे वह अत्यन्त सुदृढ़ और स्थिर था उसके अस्थिबन्धन वज्रमय थे तथा उसके पास ही सुन्दर नाभि शोभायमान हो रही थी । उस कटि भागको धारणकर वे ऐसे मालूम होते थे मानो मध्यलोकको धारणकर ऊर्ध्व और अधोभागमें विस्तारको प्राप्त हुआ लोक स्कन्ध ही हो । वे करधनीसे शोभायमान कमरको धारण किये थे जिससे ऐसे मालूम होते थे मानो सब ओर फैले हुए रत्नोंसे युक्त रत्नद्वीपको धारण किये हुए समुद्र ही हो ॥ वे वज्रके समान मजबूत, गोलाकार और एक दूसरेसे सटी हुई जिन जंघाओंको धारण किये हुए थे वे ऐसी मालूम होतीं थीं मानो जगद्रूपी

---

१ छेदनोपायः । २–दुच्छ्रयः अ०, द०, स०, प०, म०, ल० । ३ ऊर्ध्वभूमिरधित्यका । ४–णोज्ज्वलम् अ०, स०, ल० । ५ रुचिरौ चांसौ अ०, प०, म०, स०, ल० । ६ 'दृढसन्धिस्तु संहतः' । ७ स्थिरतरम् ।

मत्वोरसिल[1]मस्योद्ध्र्वकायं वेधा महाभरम् । [2]उपाजेकर्त्तु[2]मध्यूरू स्थिरे जङ्घे न्यधाद्ध्रुवम् ॥१६१॥
चन्द्रार्कसरिदम्भोधिमत्स्यकूर्मादिलक्षणम् । दधेऽधिचरणं भक्तुं चराचरमिवाश्रितम् ॥१६२॥
इति स्वभावमाधुर्यसौन्दर्यघटितं वपुः । मन्ये तादृक्सुरेन्द्राणामपि जायेत दुष्करम् ॥१६३॥
तस्य काले सुतोत्पत्तौ नाभिनालमदृश्यत । स तन्निकर्तनोपायमादिशन्नाभिरित्यभूत् ॥१६४॥
तस्यैव काले जलदाः कालिकाकर्बुरत्विषः । प्रादुरासन्नभोभागे सान्द्राः सेन्द्रशरासनाः ॥१६५॥
नभो नीरन्ध्रमारुन्धन्नजृम्भेऽम्भोमुचां चयः । कालानुभावसामर्थ्यैरारब्धः सूक्ष्मपुद्गलैः ॥१६६॥
विद्युद्वन्तो महाध्वाना वर्षन्तो रेजिरे घनाः । [3]सहेमकक्ष्या मदिनो नागा इव सगर्जिताः[4] ॥१६७॥
घनाघनघनध्वानैः प्रहता गिरिभित्तयः । प्रत्याक्रोशमिवातेनुः प्ररुष्टाः प्रतिशब्दकैः ॥१६८॥
[5]ववाववा[6]ततान्कुर्वन् कलापौघान्कलापिनाम् । घनाघनालिमुक्ताम्भःकणवाही समीरणः ॥१६९॥
चातका मधुरं [7]रेणुरभिनन्द्य घनागमम् । अकस्मात्ताण्डवारम्भमातेने शिखिनां कुलम् ॥१७०॥
अभिषेक्तुमिवारब्धा गिरीनम्भोमुचां चयाः । मुक्तधारं प्रवर्षन्तः प्रक्षरद्धातु[8]निर्झरान् ॥१७१॥

घरके भीतर लगे हुए दो मजबूत खम्भे हों। उनके शरीरका ऊर्ध्व भाग वक्षःस्थलरूपी शिलासे युक्त होनेके कारण अत्यन्त वजनदार था मानो यह समझकर ही ब्रह्माने उसे निश्चलरूपसे धारण करनेके लिए उनकी ऊरुओं (घुटनोंसे ऊपरका भाग) सहित जंघाओं (पिंडरियों) को बहुत ही मजबूत बनाया था ॥ वे जिस चरणतलको धारण किए हुए थे वह चन्द्र सूर्य, नदी, समुद्र, मच्छ, कच्छप आदि अनेक शुभलक्षणोंसे सहित था जिससे वह ऐसा मालूम होता था मानो यह चर अचर रूप सभी संसार सेवा करनेके लिए उसके आश्रयमें आ पड़ा हो। इस प्रकार स्वाभाविक मधुरता और सुन्दरतासे बना हुआ नाभि-राजका जैसा शरीर था मैं मानता हूँ कि वैसा शरीर देवोंके अधिपति इन्द्रको भी मिलना कठिन है ॥१५९–१६३॥ इनके समय में उत्पन्न होते वक्त बालककी नाभिमें नाल दिखाई देने लगा था और नाभिराजने उसके काटने की आज्ञा दी थी इसलिए इनका 'नाभि' यह सार्थक नाम पड़ गया था ॥१६४॥ इन्हींके समय आकाशमें कुछ सफेदी लिए हुए काले रङ्गके सघन मेघ प्रकट हुए थे। वे मेघ इन्द्रधनुषसे सहित थे ॥१६५॥ उस समय कालके प्रभाव से पुद्गल परमाणुओंमें मेघ बनानेकी सामर्थ्य उत्पन्न हो गयी थी, इसलिए सूक्ष्म पुद्गलों द्वारा बने हुए मेघोंके समूह छिद्ररहित लगातार समस्त आकाशको घेर कर जहाँ तहाँ फैल गए थे ॥१६६॥ वे मेघ बिजलीसे युक्त थे, गम्भीर गर्जना कर रहे थे और पानी बरसा रहे थे जिससे ऐसे शोभायमान होते थे मानों सुवर्ण की मालाओंसे सहित, मद बरसानेवाले और गरजते हुए हस्ती ही हों ॥१६७॥ उस समय मेघोंकी गम्भीर गर्जनासे टकराई हुई पहाड़ोंकी दीवालोंसे जो प्रतिध्वनि निकल रही थी उससे ऐसा मालूम होता था मानो वे पर्वतकी दीवालें कुपित होकर प्रतिध्वनिके बहाने आक्रोश वचन (गालियाँ) ही कह रही हों ॥१६८॥ उस समय मेघमाला द्वारा बरसाये हुए जलकणोंको धारण करनेवाला–ठंडा वायु मयूरोंके पंखोंको फैलाता हुआ बह रहा था ॥१६९॥ आकाशमें बादलोंका आगमन देखकर हर्षित हुए चातक पक्षी मनोहर शब्द बोलने लगे और मोरोंके समूह अकस्मात् ताण्डव नृत्य करने लगे ॥१७०॥ उस समय धाराप्रवाह बरसते हुए मेघोंके समूह ऐसे मालूम होते थे मानो जिनसे धातुओंके

---

१ उरस्थलन्तम् । 'स्वादुरस्वादुरसि लः' इत्यभिधानात् । २ आहितबलीकर्तुम् । ३ सवरत्राः । 'दूष्या कक्ष्या वरत्रा स्यात्' इत्यमरः । ४ सगर्जिताः । सजृम्भिताः ब० । ५ वाति स्म । ६ आ समन्तात् ततान् आततान् कुर्वन् । ७ 'रण शब्दे' । ८ धातुः गैरकः ।

क्वचिद्गिरिसरित्पूराः प्रावर्तन्त महारयाः[1] । धातुरागारुणा मुक्ता [2]रक्तमोक्षा इवाद्रिषु ॥१७२॥
ध्वनन्तो ववृषुमु[3]क्तस्थूलधारं पयोधराः । रुदन्त इव शोकार्ताः कल्पवृक्षपरिक्षये ॥१७३॥
[4]मार्दङ्गिककरास्फालादिव वातनिघट्टनात् । [5]पुष्करेष्विव गम्भीरं ध्वनत्सु [6]जलवाहिषु ॥१७४॥
विद्युन्नटी नभोरङ्गे विचित्राकारधारिणी । प्रतिक्षणविवृत्ताङ्गी नृत्तारम्भमिवातनोत् ॥१७५॥
पयः पयोधरासक्तैः पिबद्भिरवितृप्तिभिः । कृच्छ्र[7]लब्धमतिप्रीतैश्चातकैरर्भकायितम् ॥१७६॥
तटित्कलत्रसंसक्तैः कालापेक्षैर्महाजलैः[8] । कृषिप्रवृत्तकैर्मेघैर्व्यक्तं [9]पामरकायितम् ॥१७७॥
अबुद्धिपूर्वमुत्सृज्य वृष्टिं सद्यः पयोमुचः । [10]नैकधा विक्रियां भेजुर्वैचित्र्यात्पुद्गलात्मनः ॥१७८॥
तदा जलधरोन्मुक्तामुक्ताफलरुचोऽम्भटाः[11] । महीं [12]निर्वापयामासुर्दिवाकरकरोष्मतः ॥१७९॥
ततोऽब्दमुक्तवारिक्ष्माखानिलातपगोचरान् । [13]क्लेदाधारावगाहान्त[14]र्नीहारोष्मत्वलक्षणान् ॥१८०॥

निर्भर निकल रहे हैं ऐसे पर्वतोंका अभिषेक करनेके लिए तत्पर हुए हों ॥१७१॥ पहाड़ोंपर कहीं कहीं गेरूके रङ्गसे लाल हुए नदियोंके जो पूर बड़े वेग से बह रहे थे वे ऐसे मालूम होते थे मानो मेघोंके प्रहार से निकले हुए पहाड़ोंके रक्तके प्रवाह ही हों ॥१७२॥ वे बादल गरजते हुए मोटी धारसे बरस रहे थे जिससे ऐसा मालूम होता था मानो कल्पवृक्षोंका क्षय हो जानेसे शोकसे पीड़ित हो रुदन ही कर रहे हों—रो रो कर आँसू बहा रहे हों ॥१७३॥ वायुके आघात से उन मेघोंसे ऐसा गम्भीर शब्द होता था मानो बजानेवालेकी हाथकी चोटसे मृदङ्गका ही शब्द हो रहा हो । उसी समय आकाशमें बिजली चमक रही थी, जिससे ऐसा मालूम होता था मानो आकाश रूपी रङ्गभूमिमें अनेक रूप धारण करती हुई तथा क्षण क्षणमें यहाँ वहाँ अपना शरीर घुमाती हुई कोई नटी नृत्य कर रही हो ॥१७४-७५॥ उस समय चातक पक्षी ठीक बालकोंके समान आचरण कर रहे थे क्योंकि जिस प्रकार बालक पयोधर– माताके स्तनमें आसक्त होते हैं उसी प्रकार चातक पक्षी भी पयोधर मेघोंमें आसक्त थे, बालक जिस तरह कठिनाईसे प्राप्त हुए पय–दूधको पीते हुए तृप्त नहीं होते उसी तरह चातक पक्षी भी कठिनाईसे प्राप्त हुए पय–जलको पीते हुए तृप्त नहीं होते थे, और बालक जिस प्रकार मातासे प्रेम रखते हैं उसी प्रकार चातक पक्षी भी मेघोंसे प्रेम रखते थे ॥१७६॥ अथवा वे बादल पामर मनुष्यों-के समूहके समान आचरण करते थे क्योंकि जिस प्रकार पामर मनुष्य स्त्रीमें आसक्त हुआ करते हैं उसी प्रकार वे भी बिजली रूपी स्त्रीमें आसक्त थे, पामर मनुष्य जिस प्रकार खेतीके योग्य वर्षाकालकी अपेक्षा रखते हैं उसी प्रकार वे भी वर्षाकालकी अपेक्षा रखते थे, पामर मनुष्य जिस प्रकार महाजड़ अर्थात् महामूर्ख होते हैं उसी प्रकार वे भी महाजल अर्थात् भारी जलसे भरे हुए थे (संस्कृत साहित्यमें श्लेष आदिके समय ड और ल में अभेद होता है) और पामर मनुष्य जिस प्रकार खेती करनेमें तत्पर रहते हैं उसी प्रकार मेघ भी खेती करानेमें तत्पर थे ॥१७७॥ यद्यपि वे बादल बुद्धिरहित थे तथापि पुद्गल परमाणुओंकी विचित्र परिणति होनेके कारण शीघ्र ही बरसकर अनेक प्रकारकी विकृतिको प्राप्त हो जाते थे ॥१७८॥ उस समय मेघोंसे जो पानीकी बूँदे गिर रही थीं वे मोतियोंके समान सुन्दर थीं तथा उन्होंने सूर्यकी किरणोंके तापसे तपी हुई पृथ्वीको शान्त कर दिया था ॥१७९॥ इसके अनन्तर मेघोंसे पड़े हुए जलकी आर्द्रता,

१ वेगाः । २ रक्तमोचनाः । ३–स्थूलधाराः म०, ल० । ४ मृदङ्गवादकः । ५ वाद्यवक्त्रेषु । ६ मेघेषु । ७ लब्धमिव प्री–म०, स०, ल० । ८ महातोयैः महाजडैश्च । ९ पामर इव आचरितम् । १० अनेकधा । ११ –रुचोऽप्छटा अ०, प०, द० । –रुचश्छटा स० । –रुचो घटा म० । –रुचो छटा ल० । १२ शैत्यं नयन्ति स्म इत्यर्थः । १३ आर्द्रता । १४ अन्तर्हितशोषणत्वम् ।

गुणानाश्रित्य सामग्रीं प्राप्य द्रव्यादिलक्षणाम्[1] । संरूढान्यङ्कुरावस्थाप्रभृत्याकणिशाहितः ॥१८१॥
शनैश्शनैर्विवृद्धानि क्षेत्रेष्वविरलं तदा । सस्यान्यकृष्टपच्यानि नानाभेदानि सर्वतः ॥१८२॥
प्रजानां पूर्वसुकृतात् कालादपि च तादृशात् । सुपक्वानि यथाकालं फलदायीनि रेजिरे[2] ॥१८३॥
तदा पितृव्यतिक्रान्तावपत्यानीव तत्पदम्। कल्पवृक्षोचितं[3] स्थानं तान्यध्यासिषत स्फुटम् ॥१८४॥
नातिवृष्टिरवृष्टिर्वा तदासीत्किन्तु मध्यमा । वृष्टिस्त[4]त्सर्वधान्यानां फलावाप्तिरविप्लुता[5] ॥१८५॥
षाष्टिकाः कलमव्रीहियवगोधूमकङ्गवः[6] । [7]श्यामाकको[8]द्रवो[9]दार[10]नीवारवरका[11]स्तथा ॥१८६॥
तिलातस्यौ मसूराश्च [12]सर्षपो [13]धान्यजीरकौ[14] । [15]मुद्गमाषा[16]ढकी[17]राज[18]माष[19]निष्पावकाश्चणाः[20] ॥१८७॥
[21]कुलित्थत्रिपुटौ[22] चेति धान्यभेदास्त्विमे मताः । सकुसुम्भाः सकर्पासाः प्रजाजीवनहेतवः ॥१८८॥
उपभोग्येषु धान्येषु सत्स्वप्येषु तदा प्रजाः । तदुपायमजानानाः [23]स्वतोऽमूर्मुमुहु[24]र्मुहुः ॥१८९॥
कल्पद्रुमेषु कार्त्स्न्येन प्रलीनेषु निराश्रयाः । युगस्य परिवर्त्तेऽस्मिन्नभूवन्नाकुला कुलाः ॥१९०॥
तीव्राया[25]मशनायाया[26]मुदीर्णाहारसंज्ञकाः[27] । जीवनोपायसंशीति[28]व्याकुलीकृतचेतसः ॥१९१॥

पृथिवीका आधार, आकाशका अवगाहन, वायुका अन्तर्नीहार अर्थात् शीतल परमाणुओंका संचय करना और धूपकी उष्णता इन सब गुणोंके आश्रयसे उत्पन्न हुई द्रव्य क्षेत्र काल भाव रूपी सामग्रीको पाकर खेतोंमें अनेक अङ्कुर पैदा हुए, वे अङ्कुर पास पास जमे हुए थे तथा अङ्कुर अवस्थासे लेकर फल लगने तक निरन्तर धीरे धीरे बढ़ते जाते थे । इसी प्रकार और भी अनेक प्रकारके धान्य बिना बोये ही सब ओर पैदा हुए थे । वे सब धान्य प्रजाके पूर्वोपार्जित पुण्य कर्मके उदयसे अथवा उस समयके प्रभावसे ही समय पाकर पक गए तथा फल देनेके योग्य हो गए ।।१८०–८३।। जिस प्रकार पिताके मरनेपर पुत्र उनके स्थानपर आरूढ़ होता है उसी प्रकार कल्पवृक्षोंका अभाव होनेपर वे धान्य उनके स्थानपर आरूढ़ हुए थे ।।१८४। उस समय न तो अधिक वृष्टि होती थी और न कम, किन्तु मध्यम दरजेकी होती थी इसलिए सब धान्य बिना किसी विघ्न बाधाके फलसहित हो गए थे ।।१८५।। साठी, चावल, कलम, व्रीहि, जौ, गेहूँ, कांगनी, सामा, कोदो, नीवार (तिन्नी), बटाने, तिल, अलसी, मसूर, सरसों, धनियाँ, जीरा, मूँग, उड़द, अरहर, रोंसा, मोठ, चना, कुलथी और तेवरा आदि अनेक प्रकारके धान्य तथा कुसुम्भ (जिसकी कुसुमानी—लाल रंग बनता है) और कपास आदि प्रजाकी आजीविकाके हेतु उत्पन्न हुए थे ।।१८६–१८८।। इस प्रकार भोगोपभोगके योग्य इन धान्योंके मौजूद रहते हुए भी उनके उपयोगको नहीं जाननेवाली प्रजा बार बार मोह को प्राप्त होती थी—वह उन्हें देखकर बार बार भ्रममें पड़ जाती थी ।।१८९। इस युग-परिवर्तनके समय कल्प वृक्ष बिलकुल ही नष्ट हो गये थे इसलिये प्रजाजन निराश्रय होकर अत्यन्त व्याकुल होने लगे ।।१९०।। उस समय आहार संज्ञाके उदयसे उन्हें तीव्र भूख लग

---

१ –लक्षणाम् अ०, प० । २ जज्ञिरे अ०, द०, प०, स०, म० । ३ –चितस्थानं म०, ल० । ४ तत्कारणात् । ५ अबाधिता । ६ पीततण्डुलाः । ७ 'श्यामाकस्तु स्मयाकः स्यात्' । ८ कोरदूषः । ९ –द्रवोद्दाल–द० । १० उदारनिवारः तृणधान्यम् । ११ [मटर इति हिन्दी भाषायाम्] १२ तुन्दुभः । १३ धान्यकम् । १४ जीरणः । १५ मुद्गः पीतमुद्गो वा 'खण्डीरः पीतमुद्गः स्यात् कृष्णमुद्गस्तु शिम्बिका'' इत्यभिधानात् । १६ वृष्यः । १७ तुवरिका । १८ अलसान्द्र ['रोंसा' इति हिन्दी] । १९ निष्पावः ['मोठ' इति हिन्दी] 'समौ तुवलक-निष्पावौ' । २० हरिमन्थकाः ॥ २१ कुलत्थिका ''कुलत्थिका पिलकुलः'' । २२ त्रिपुटः ['तेवरा' इति हिन्दीभाषायाम्] २३ स्वतो मूढा मुहुर्मुहुः प० । २४ मुह्यन्ति स्म । २५ बुभुक्षायाम् । २६ उदीर्णा उदिता । २७–संज्ञया द०, स०, ल० । २८ संशयः ।

युगमुख्यमुपासीना[1] नाभिं मनुमपश्चिमम्[2] । ते तं विज्ञापयामासुरिति दीनगिरो नराः ॥१९२॥
जीवामः कथमेवाद्य नाथानाथा विना द्रुमैः । [3]कल्पदायिभिराकल्पमविस्मार्यैरपुण्यकाः ॥१९३॥
इमे केचिदितो देव तरुभेदाः समुत्थिताः । शाखाभिः फलनम्राभिराह्वयन्तीव नोऽधुना ॥१९४॥
किमिमे परिहर्तव्याः किंवा भोग्यफला इमे । [4]फलेग्रहीनिमेऽस्मान्वा निगृह्णन्त्यनुपान्ति[5] वा ॥१९५॥
अमीषा[6]मुपशल्येषु केऽप्यमी तृणगुल्मकाः फलनम्रशिखा भान्ति [7]विश्वदिक्कमितोऽमुतः ॥१९६॥
क एषामुपयोगः स्याद्विनियोज्याः[8] कथं नु वा । किमिमे स्वैरसंग्राह्या न वेतीदं वदाद्य नः ॥१९७॥
त्वं देव सर्वमप्येतद् वेत्सि नाभेऽनभिज्ञकाः । पृच्छामो वयमद्यार्त्तास्ततो ब्रूहि प्रसीद नः ॥१९८॥
[9]इतिकर्तव्यतामूढा[10]नतिभीतांस्तदार्यकान् । नाभिर्न [11]भेयमित्युक्त्वा व्याजहार पुनः स तान् ॥१९९॥
इमे [12]कल्पतरूच्छेदे द्रुमाः पक्वफलानताः । युष्मानद्यानुगृह्णन्ति पुरा कल्पद्रुमा यथा ॥२००॥
भद्रकास्तदिमे भोग्याः कार्या न भ्रान्तिरत्र वः । अमी च परिहर्तव्या दूरतो विषवृक्षकाः ॥२०१
इमाश्च [13]नामौषधयः [14]स्तम्बकर्यादयो मताः । एतासां भोज्यमन्नाद्यं व्यञ्जनाद्यः सुसंस्कृतम् ॥२०२॥

खाङ्गणे गणनातीता रत्नधारा रराज सा । विप्रकीर्णेव कालेन तरला तारकावली ॥९२॥
विद्युदिन्द्रायुधे किञ्चित् जटिले[4] सुरनायकैः । दिवो विगलिते स्याताम् इत्यसौ क्षणमैक्ष्यत ॥९३॥
किमेषा वैद्युती[5] दीप्तिः किमुत द्युसदां[6] द्युतिः । इति व्योमचरैरैक्षि क्षणमाशङ्क्य साम्बरे ॥९४॥
सैषा हिरण्मयी वृष्टिः धनेशेन निपातिता । विभोर्हिरण्यगर्भत्वमिव बोधयितुं जगत् ॥९५॥
षण्मासानिति सापप्तत् पुण्ये नाभिनृपालये । स्वर्गावतरणाद् भर्तुः प्राक्तरां [7]द्युम्नसन्ततिः ॥९६॥
पश्चाच्च नवमासेषु वसुधारा तदा[8] मता । अहो महान् प्रभावोऽस्य तीर्थकृत्त्वस्य भाविनः ॥९७॥
रत्नगर्भा धरा जाता हर्षगर्भाः सुरोत्तमाः । क्षोभमायाज्जगद्गर्भो गर्भाधानोत्सवे[9] विभोः[10] ॥९८॥
सिक्ता जलकणैर्गाङ्गैः मही रत्नैरलङ्कृता । गर्भाधाने[11] जगद्भर्तुः गर्भिणीवाभवद् गुरुः ॥९९॥
रत्नैः कीर्णा प्रसूनैश्च सिक्ता गन्धाम्बुभिर्बभौ । [12]तदास्नातानुलिप्तेव भूषिताङ्गी धराङ्गना ॥१००॥

अथवा विमानोंसे ज्योतिषी देवोंकी उत्कृष्ट प्रभा ही आ रही हो ॥ ८९ ॥ अथवा आकाशसे बरसती हुई रत्नवृष्टिको देखकर लोग यही उत्प्रेक्षा करते थे कि क्या जगत्में क्षोभ होनेसे निधियोंका गर्भपात हो रहा है ॥ ९० ॥ आकाशरूपी आँगनमें जहाँ-तहाँ फैले हुए वे रत्न क्षण भरके लिये ऐसे शोभायमान होते थे मानो देवोंके हाथियोंने कल्पवृक्षोंके फल ही तोड़ तोड़कर डाले हों ॥ ९१ ॥ आकाशरूपी आँगनमें वह असंख्यात रत्नोंकी धारा ऐसी जान पड़ती थी मानो समय पाकर फैली हुई नक्षत्रोंकी चञ्चल और चमकीली पङ्क्ति ही हो ॥ ९२ ॥ अथवा उस रत्न-वर्षाको देखकर क्षणभरके लिये यही उत्प्रेक्षा होती थी कि स्वर्गसे मानो परस्पर मिले हुए बिजली और इन्द्रधनुष ही देवोंने नीचे गिरा दिये हों ॥ ९३ ॥ अथवा देव और विद्याधर उसे देखकर क्षणभरके लिये यही आशंका करते थे कि यह क्या आकाशमें बिजलीकी कान्ति है अथवा देवोंकी प्रभा है ? ॥ ९४ ॥ कुबेरने जो यह हिरण्य अर्थात् सुवर्णकी वृष्टि की थी वह ऐसी मालूम होती थी मानो जगत्को भगवान्‌की 'हिरण्यगर्भता' बतलानेके लिये ही की हो [जिसके गर्भमें रहते हुए हिरण्य-सुवर्णकी वर्षा आदि हो वह हिरण्यगर्भ कहलाता है] ॥ ९५ ॥ इस प्रकार स्वामी वृषभदेवके स्वर्गावतरणसे छह महीने पहलेसे लेकर अतिशय पवित्र नाभिराजके घरपर रत्न और सुवर्णकी वर्षा हुई थी ॥ ९६ ॥ और इसी प्रकार गर्भावतरणसे पीछे भी नौ महीने तक रत्न तथा सुवर्णकी वर्षा होती रही थी सो ठीक ही है क्योंकि होनेवाले तीर्थंकरका आश्चर्यकारक बड़ा भारी प्रभाव होता है ॥ ९७ ॥ भगवान्‌के गर्भावतरण-उत्सवके समय यह समस्त पृथिवी रत्नोंसे व्याप्त हो गई थी देव हर्षित हो गये थे और समस्त लोक क्षोभको प्राप्त हो गया था ॥ ९८ ॥ भगवान्‌के गर्भावतरणके समय यह पृथिवी गंगा नदीके जलके कणोंसे सींची गई थी तथा अनेक प्रकारके रत्नोंसे अलंकृत की गई थी इसलिये वह भी किसी गर्भिणी स्त्रीके समान भारी हो गई थी ॥ ९९ ॥ उस समय रत्न और फूलोंसे व्याप्त तथा सुगन्धित जलसे सींची गई यह पृथिवीरूपी स्त्री स्नान कर चन्दनका विलेपन लगाये और आभूषणोंसे सुसज्जित

---

१ खाद् वृष्टा ल० । भ्रष्टा पतिता । २ स्रुति स्रवः । ३ पातितानि । 'शद्ल शातने' । ४ घनतां नीते । ५ विद्युत्सम्बन्धिनी । ६ देवानाम् । ७ हिरण्यसमूहः 'हिरण्यं द्रविणं द्युम्नम्' । ८ तथा स०, म०, द०, ल० । ९ आगच्छत् । १० गर्भादानोत्सवे म०, ल० । ११ अयं श्लोकः पुरुदेवचम्पूकर्त्रा स्वकीयग्रन्थस्य चतुर्थस्तवकस्यैकविंशस्थाने स्थापितः । १२ गर्भादाने म०, ल० । १३ स्नातानुलिप्तेव अ०, ल० । स०, म० पुस्तकयोरुभयथा पाठः ।

सम्मता नाभिराजस्य पुष्पवत्यरजस्वला । वसुन्धरा तदा भेजे जिनमातुरनुक्रियाम्[1] ॥१०१॥
अथ सुप्तैकदा देवी सौधे मृदुनि तल्पके । गङ्गातरङ्गसच्छाय[2]दुकूलप्रच्छदोज्ज्वले ॥१०२॥
सापश्यत् षोडशस्वप्नान् इमान् शुभफलोदयान् । निशायाः पश्चिमे यामे जिनजन्मानुशंसिनः ॥१०३॥
गजेन्द्रमैन्द्रमामन्द्रबृंहितं त्रिमदस्रुतम्[3] । ध्वनन्तमिव सासार[4] सा ददर्श शरद्घनम् ॥१०४॥
गवेन्द्रं दुन्दुभिस्कन्धं कुमुदापाण्डुरद्युतिम् । पीयूषराशिनीकाशं[5] सापश्यन् मन्द्रनिःस्वनम्[6] ॥१०५॥
मृगेन्द्रमिन्दुसच्छायवपुषं रक्तकन्धरम् । ज्योत्स्नया संध्यया चैव घटिताङ्गमिवैक्षत ॥१०६॥
पद्मां पद्ममयोत्तुङ्गविष्टरे सुरवारणैः । स्नाप्यां हिरण्मयैः कुम्भैः अदर्शत् स्वामिव श्रियम् ॥१०७॥
दामनी कुसुमामोद-[7]समालग्नमदालिनी । तज्झङ्कृतैरिवारब्धगाने सानन्दमैक्षत ॥१०८॥
समग्रबिम्बमुज्ज्योत्स्नं ताराधीशं सतारकम् । स्मेरं स्वमिव वक्त्राब्जं समौक्तिकमलोकयत् ॥१०९॥
विधूतध्वान्तमुद्यन्तं भास्वन्तमुदयाचलात् । शातकुम्भमयं कुम्भमिवाद्राक्षीत् स्वमङ्गले ॥११०॥
कुम्भौ हिरण्मयौ पद्मपिहितास्यौ व्यलोकत । स्तनकुम्भाविवात्मीयौ समासक्तकराम्बुजौ ॥१११॥

सी जान पड़ती थी ॥१००॥ अथवा उस समय वह पृथिवी भगवान् वृषभदेवकी माता मरुदेवीकी सदृशताको प्राप्त हो रही थी क्योंकि मरुदेवी जिस प्रकार नाभिराजको प्रिय थी उसी प्रकार वह पृथिवी उन्हें प्रिय थी और मरुदेवी जिस प्रकार रजस्वला न होकर पुष्पवती थी उसी प्रकार वह पृथिवी भी रजस्वला (धूलिसे युक्त) न होकर पुष्पवती (जिसपर फूल बिखरे हुए थे) थी ॥१०१॥

अनन्तर किसी दिन मरुदेवी राजमहलमें गंगाकी लहरोंके समान सफेद और रेशमी चद्दरसे उज्ज्वल कोमल शय्या पर सो रही थी। सोते समय उसने रात्रिके पिछले पहरमें जिनेन्द्र देवके जन्मको सूचित करनेवाले तथा शुभ फल देनेवाले नीचे लिखे हुए स्वप्न देखे ॥ १०२–१०३ ॥ सबसे पहले उसने इन्द्रका ऐरावत हाथी देखा। वह गंभीर गर्जना कर रहा था तथा उसके दोनों कपोल और सूँड़ इन तीन स्थानोंसे मद झर रहा था इसलिये वह ऐसा जान पड़ता था मानो गरजता और बरसता हुआ शरद् ऋतुका बादल ही हो ॥ १०४ ॥ दूसरे स्वप्नमें उसने एक बैल देखा। उस बैलके कंधे नगाड़ेके समान विस्तृत थे, वह सफेद कमलके समान कुछ कुछ शुक्ल वर्ण था। अमृतकी राशिके समान सुशोभित था और मन्द्र गंभीर शब्द कर रहा था ॥ १०५ ॥ तीसरे स्वप्नमें उसने एक सिंह देखा। उस सिंहका शरीर चन्द्रमाके समान शुक्लवर्ण था और कंधे लाल रंगके थे इसलिये वह ऐसा मालूम होता था मानो चाँदनी और संध्याके द्वारा ही उसका शरीर बना हो ॥ १०६ ॥ चौथे स्वप्नमें उसने अपनी शोभाके समान लक्ष्मीको देखा। वह लक्ष्मी कमलोंके बने हुए ऊंचे आसन पर बैठी थी और देवोंके हाथी सुवर्णमय कलशोंसे उसका अभिषेक कर रहे थे ॥१०७॥ पाँचवें स्वप्नमें उसने बड़े ही आनन्दके साथ दो पुष्प-मालाएँ देखीं। उन मालाओं पर फूलोंकी सुगन्धिके कारण बड़े बड़े भौंरे आ लगे थे और वे मनोहर झंकार शब्द कर रहे थे जिनसे ऐसा जान पड़ता था मानो उन मालाओंने गाना ही प्रारम्भ किया हो ॥ १०८ ॥ छठवें स्वप्नमें उसने पूर्ण चन्द्रमण्डल देखा। वह चन्द्रमण्डल ताराओंसे सहित था और उत्कृष्ट चाँदनीसे युक्त था इसलिये ऐसा जान पड़ता था मानो मोतियोंसे सहित हँसता हुआ अपना (मरुदेवीका) मुख-कमल ही हो ॥ १०९ ॥ सातवें स्वप्नमें उसने उदयाचलसे उदित होते हुए तथा अन्धकारको नष्ट करते हुए सूर्यको देखा। वह सूर्य ऐसा मालूम होता था मानो मरुदेवीके माङ्गलिक कार्यमें रखा हुआ सुवर्णमय कलश ही हो ॥ ११० ॥ आठवें स्वप्नमें उसने सुवर्णके दो कलश देखे। उन कलशोंके मुख कमलोंसे ढके हुए थे जिससे वे ऐसे जान पड़ते थे मानो हस्तकमलसे आच्छादित हुए अपने दोनों स्तन-

---

१ सादृश्यम्। २ –सच्छाये अ०, स०, म०, ल०। ३ कपोलद्वयनासिकाग्रमिति त्रिस्थानमदस्राविणम्। ४ आसारेण सहितम्। ५ सदृशम्। ६ –मन्द्रनिःस्वनम् म०, ल०। ७ समलग्नमदालिनी।

झषौ सरसि संफुल्लकुमुदोत्पलपङ्कजे । सापश्यन्नयनायामं[1] दर्शयन्ताविवात्मनः ॥११२॥
तरत्सरोजकिञ्जल्कपिञ्जरोदकमैक्षत । सुवर्णद्रवसम्पूर्णमिव दिव्यं सरोवरम् ॥११३॥
क्षुभ्यन्तमब्धिमुद्वेलं चलत्कल्लोलकाहलम्[2] । सादर्शच्छीकरैर्मोक्तुम् अट्टहासमिवोद्यतम् ॥११४॥
सैंहमासनमुत्तुङ्गं स्फुरन्मणिहिरण्मयम् । सापश्यन्मेरुशृङ्गस्य वैदग्धीं[3] दधदूर्जिताम् ॥११५॥
नाकालयं व्यलोकिष्ट परार्ध्यमणिभासुरम् । स्वसूनोः प्रसवागारमिव[4] देवैरुपाहृतम्[5] ॥११६॥
फणीन्द्रभवनं भूमिम् उद्भिद्योद्गतमैक्षत । प्राग्दृष्टस्वर्विमानेन स्पर्द्धां कर्त्तु[6]मिवोद्यतम् ॥११७॥
रत्नानां राशिमुत्सर्पदंशुपल्लवितांबरम् । सा निदध्यौ[6] धरादेव्या निधानमिव दर्शितम् ॥११८॥
ज्वलद्भासुरनिर्धूमवपुषं विषमार्चिषम्[7] । प्रतापमिव पुत्रस्य मूर्त्तरूपं न्यचायत[8] ॥११९॥
न्यशामयच्च[9] तुङ्गाङ्गं पुङ्गवं रुक्मसच्छविम् । प्रविशन्तं स्ववक्त्राब्जं स्वप्नान्ते पीनकन्धरम् ॥१२०॥
ततः [10]प्राबोधिकैस्तूर्यैः ध्वनद्भिः प्रत्यबुद्ध सा । बन्दिनां मङ्गलोद्गीतीः शृण्वतीति सुमङ्गलाः ॥१२१
सुखप्रबोधमाधातुम् एतस्याः पुण्यपाठकाः । तदा प्रपेठुरित्युच्चैः मङ्गलान्यस्खलद्गिरः ॥१२२॥

कलश ही हों ॥ १११ ॥ नौवें स्वप्नमें फूले हुए कुमुद और कमलोंसे शोभायमान तालाबमें क्रीड़ा करती हुई दो मछलियाँ देखीं। वे मछलियाँ ऐसी मालूम होती थीं मानो अपने (मरुदेवीके) नेत्रोंकी लम्बाई ही दिखला रही हों ॥ ११२ ॥ दशवें स्वप्नमें उसने एक सुन्दर तालाब देखा। उस तालाबका पानी तैरते हुए कमलोंकी केशरसे पीला पीला हो रहा था जिससे ऐसा मालूम होता था मानो पिघले हुए सुवर्णसे ही भरा हो ॥ ११३ ॥ ग्यारहवें स्वप्नमें उसने क्षुभित हो वेला (तट) को उल्लघंन करता हुआ समुद्र देखा। उस समय उस समुद्रमें उठती हुई लहरोंसे कुछ कुछ गंभीर शब्द हो रहा था और जलके छोटे छोटे कण उड़कर उसके चारों ओर पड़ रहे थे जिससे ऐसा मालूम होता था मानो वह अट्टहास ही कर रहा हो ॥ ११४ ॥ बारहवें स्वप्नमें उसने एक ऊंचा सिंहासन देखा। वह सिंहासन सुवर्णका बना हुआ था और उसमें अनेक प्रकारके चमकीले मणि लगे हुए थे जिससे ऐसा मालूम होता था मानो वह मेरु पर्वतके शिखरकी उत्कृष्ट शोभा ही धारण कर रहा हो ॥ ११५ ॥ तेरहवें स्वप्नमें उसने एक स्वर्गका विमान देखा। वह विमान बहुमूल्य श्रेष्ठ रत्नोंसे देदीप्यमान था और ऐसा मालूम होता था मानो देवोंके द्वारा उपहारमें दिया हुआ, अपने पुत्रका प्रसूतिगृह (उत्पत्तिस्थान) ही हो ॥ ११६ ॥ चौदहवें स्वप्नमें उसने पृथिवीको भेदन कर ऊपर आया हुआ नागेन्द्रका भवन देखा। वह भवन ऐसा मालूम होता था मानो पहले दिखे हुए स्वर्गके विमानके साथ स्पर्धा करनेके लिये ही उद्यत हुआ हो ॥ ११७ ॥ पन्द्रहवें स्वप्नमें उसने अपनी उठती हुई किरणोंसे आकाशको पल्लवित करनेवाली रत्नोंकी राशि देखी। उस रत्नोंकी राशिको मरुदेवीने ऐसा समझा था मानो पृथिवी देवीने उसे अपना खजाना ही दिखाया हो ॥ ११८ ॥ और सोलहवें स्वप्नमें उसने जलती हुई प्रकाशमान तथा धूमरहित अग्नि देखी। वह अग्नि ऐसी मालूम होती थी मानो होनेवाले पुत्रका मूर्तिधारी प्रताप ही हो ॥ ११९ ॥ इस प्रकार सोलह स्वप्न देखनेके बाद उसने देखा कि सुवर्णके समान पीली कान्तिका धारक और ऊंचे कंधोंवाला एक ऊँचा बैल हमारे मुख-कमलमें प्रवेश कर रहा है ॥ १२० ॥

तदनन्तर वह बजते हुए बाजोंकी ध्वनिसे जग गई और बन्दीजनोंके नीचे लिखे हुए मङ्गलकारक मङ्गल-गीत सुनने लगी ॥१२१॥ उस समय मरुदेवीको सुख-पूर्वक जगानेके लिये, जिनकी वाणी अत्यन्त स्पष्ट है ऐसे पुण्य पाठ करनेवाले बन्दीजन उच्च स्वरसे नीचे लिखे अनुसार मङ्गल-

---

१ दैर्घ्यम्। २ अव्यक्तशब्दम्। ३ शोभाम्। ४ प्रसूतिगृहम्। ५ उपायनीकृत्यानीतम्। ६ ददर्श। ७ सप्तार्चिषम् अग्निम् इति यावत्। ८ ऐक्षत 'चायृ पूजायां च'। ९ अपश्यत्। १० प्रबोधे नियुक्तैः।

प्रबोधसमयोऽयं ते देवि सम्मुखमागतः । रचयन् [1]दरविश्लिष्टदलैरब्जैरिवाञ्जलिम् ॥१२३॥
विभावरी विभात्येषा दधती बिम्बमैन्दवम् । जितं त्वन्मुखकान्त्येव गलज्ज्योत्स्ना [2]परिच्छदम् ॥१२४॥
विच्छायतां गते चन्द्रबिम्बे मन्दीकृतादरम् । जगदानन्दयत्वद्य [3]विबुद्धं त्वन्मुखाम्बुजम् ॥१२५॥
दिगङ्गनामुखानीन्दुः संस्पृशन्नस्फुटैः करैः । [4]आपिपृच्छिषते नूनं [5]प्रवसन्स्वप्रियाङ्गनाः ॥१२६॥
तारातातिरियं व्योम्नि विरलं लक्ष्यतेऽधुना । विप्रकीर्णेव हारश्रीः यामिन्या गतिसंभ्रमात् ॥१२७॥
रूयते[6] कलमामन्द्रम् इतः सरसि सारसैः । स्तोतुकामैरिवास्माभिः समं [7]त्वाम्नात[8]मङ्गलैः ॥१२८॥
उ[9]च्छ्वसत्कमलास्येयम् इतोऽधिगृह[10]दीर्घिकम् । भवन्तीं गायतीवोच्चैः अब्जिनी भ्रमरारवैः ॥१२९॥
निशाविरहसंतप्तम् इतश्चक्राह्वयोर्युगम् । सरस्तरङ्गसंस्पर्शैः इदमाश्वास्यतेऽधुना ॥१३०॥
रथाङ्गमिथुनैरद्य प्रार्थ्यते [11]मित्रसन्निधिः । तीव्रमायासितैरन्तः करैरिन्दोर्विदाहिभिः ॥१३१॥
दुनोति[12] कृकवाकूणां ध्वनिरेष समुच्चरन् । कान्तासन्नवियोगार्तिपिशुनः कामिनां मनः ॥१३२॥
यदिन्दोः प्रशमान्यस्य [13]नोदस्तं मृदुभिः करैः । तत्प्रलीनं तमो नैशं[14] [15]खरांशावुदयोन्मुखे ॥१३३॥

पाठ पढ़ रहे थे ॥ १२२ ॥ हे देवि, यह तेरे जागनेका समय है जो कि ऐसा मालूम होता है मानो कुछ-कुछ फूले हुए कमलोंके द्वारा तुम्हें हाथ ही जोड़ रहा हो ॥ १२३ ॥ तुम्हारे मुखकी कांतिसे पराजित होनेके कारण ही मानो जिसकी समस्त चांदनी नष्ट हो गई है ऐसे चन्द्र-मण्डलको धारण करती हुई यह रात्रि कैसी विचित्र शोभायमान हो रही है ॥१२४॥ हे देवि, अब कांतिरहित चन्द्रमामें जगत्का आदर कम हो गया है इसलिये प्रफुल्लित हुआ यह तेरा मुख-कमल ही समस्त जगत्को आनन्दित करे ॥ १२५ ॥ यह चन्द्रमा छिपी हुई किरणों (पक्षमें हाथों) से अपनी दिशारूपी स्त्रियोंके मुखका स्पर्श कर रहा है जिससे ऐसा मालूम होता है मानो परदेश जानेके लिए अपनी प्यारी स्त्रियोंसे आज्ञा ही लेना चाहता हो ॥ १२६ ॥ ताराओंका समूह भी अब आकाशमें कहीं-कहीं दिखाई देता है और ऐसा जान पड़ता है मानो जानेकी जल्दीसे रात्रिके हारकी शोभा ही टूट-टूटकर बिखर गई हो ॥ १२७ ॥ हे देवि, इधर तालाबोंपर ये सारस पक्षी मनोहर और गम्भीर शब्द कर रहे हैं और ऐसे मालूम होते हैं मानो मंगल-पाठ करते हुए हम लोगोंके साथ-साथ तुम्हारी स्तुति ही करना चाहते हों ॥ १२८ ॥ इधर घरकी बावड़ीमें भी कमलिनीके कमलरूपी मुख प्रफुल्लित हो गये हैं और उनपर भौंरे शब्द कर रहे हैं जिससे ऐसा मालूम होता है मानो वह कमलिनी उच्च-स्वरसे आपका यश ही गा रही हो ॥ १२९ ॥ इधर रात्रिमें परस्परके विरहसे अतिशय संतप्त हुआ यह चकवा-चकवीका युगल अब तालाबकी तरंगोंके स्पर्शसे कुछ-कुछ आश्वासन प्राप्त कर रहा है ॥१३०॥ अतिशय दाह करनेवाली चन्द्रमाकी किरणोंसे हृदयमें अत्यन्त दुखी हुए चकवा चकवी अब मित्र (सूर्य) के समागमकी प्रार्थना कर रहे हैं भावार्थ—जैसे जब कोई किसीके द्वारा सताया जाता है तब वह अपने मित्रके साथ समागमकी इच्छा करता है वैसे ही चकवा-चकवी चन्द्रमाके द्वारा सताये जानेपर मित्र अर्थात् सूर्यके समागमकी इच्छा कर रहे हैं ॥१३१॥ इधर बहुत जल्दी होनेवाले स्त्रियोंके वियोगसे उत्पन्न हुए दुःखकी सूचना करनेवाली मुर्गोंकी तेज आवाज कामी पुरुषोंके मनको संताप पहुँचा रही है ॥ १३२ ॥ शांत स्वभावी चन्द्रमाकी कोमल किरणोंसे रात्रिका जो अन्धकार नष्ट नहीं हो सका था वह अब तेज

---

१ ईषद् विकसित । २ परिकरः । ३ विकसितम् । ४ अनुज्ञापयितुमिच्छति । ५ गच्छन् । ६ शब्द्यते । 'रु शब्दे' । ७ त्वा त्वाम् । ८ आम्नात अभ्यस्त । त्वामात्तमङ्गलैः अ०, प०, म०, ल० । ९ विकसत्कमलानना । १० गृहदीर्घिकायाम् । ११ सूर्यसमीपम् महायममीपं वा । १२ परितापयति 'टुदु परितापे' । १३ न नाशितम् । १४ निशाया इदम् । १५ रवौ ।

तमः शार्वरमुद्भिद्य करैर्भानोरुदेष्यतः । सेनेवाग्रेसरी सन्ध्या स्फुरत्येषानुरागिणी ॥१३४॥
मित्रमण्डलमुद्यच्छद् इदमातनुते द्वयम् । विकासमब्जिनीषण्डे[1] ग्लानिं च कुमुदाकरे ॥१३५॥
[2]विकस्वरं समालोक्य पद्मिन्याः पङ्कजाननम् । सासूयेव परिम्लानिं प्रयात्येषा कुमुद्वती ॥१३६॥
पुरः प्रसारयन्नुच्चैः करानुद्याति भानुमान् । प्राचीदिगङ्गनागर्भात् तेजोगर्भ इवार्भकः ॥१३७॥
लक्ष्यते निषधोत्सङ्गे भानुरारक्तमण्डलः । पुञ्जीकृत इवैकत्र सान्ध्यो रागः सुरेश्वरैः ॥१३८॥
तमो [3]विधूतमुद्भूतः चक्रवाकपरिक्लमः । प्रबोधिताब्जिनी भानोः [4]जन्मनोन्मीलितं[5] जगत् ॥१३९॥
समन्तादापतत्येष[6] प्रभाते शिशिरो मरुत् । कमलामोदमाकर्षन् प्रफुल्लादब्जिनीवनात् ॥१४०॥
इति प्रस्पष्ट एवायं प्रबोधसमयस्तव । देवि मुञ्चाधुना तल्पं शुचि हंसीव सैकतम् ॥१४१॥
[7]सुप्रातमस्तु ते नित्यं कल्याणशतभाग्भव । प्राचीवार्क प्रसोषीष्ठा[8] पुत्रं त्रैलोक्यदीपकम् ॥१४२॥
स्वप्नसंदर्शनादेव प्रबुद्धा प्राक्तरां पुनः । प्रबोधितेत्यदर्शत् सा संप्रमोदमयं जगत् ॥१४३॥
प्रबुद्धा च शुभस्वप्नदर्शनानन्दनिर्भरात्[9] । तनुं कण्टकितामूहे साब्जिनीव विकासिनी ॥१४४॥

किरणवाले सूर्यके उदयके सन्मुख होते ही नष्ट हो गया है ॥ १३३ ॥ अपनी किरणोंके द्वारा रात्रि संबन्धी अंधकारको नष्ट करनेवाला सूर्य आगे चलकर उदित होगा परन्तु उससे अनुराग (प्रेम और लाली) करनेवाली संध्या पहलेसे ही प्रकट हो गई है और ऐसी जान पड़ती है मानो सूर्यरूपी सेनापतिकी आगे चलनेवाली सेना ही हो ॥ १३४ ॥ यह उदित होता हुआ सूर्यमण्डल एक साथ दो काम करता है—एक तो कमलिनियोंके समूहमें विकासको विस्तृत करता है और दूसरा कुमुदिनियोंके समूहमें म्लानताका विस्तार करता है ॥ १३५ ॥ अथवा कमलिनीके कमलरूपी मुखको प्रफुल्लित हुआ देखकर यह कुमुदिनी मानो ईर्षासे म्लानताको प्राप्त हो रही है ॥ १३६ ॥ यह सूर्य अपने ऊंचे कर अर्थात् किरणोंको (पक्षमें हाथोंको) सामने फैलाता हुआ उदित हो रहा है जिससे ऐसा मालूम होता है मानो पूर्व दिशारूपी स्त्रीके गर्भसे कोई तेजस्वी बालक ही पैदा हो रहा हो ॥ १३७ ॥ निषध पर्वतके समीप आरक्त (लाल) मण्डलका धारक यह सूर्य ऐसा जान पड़ता है मानो इन्द्रोंके द्वारा इकट्ठा किया हुआ सब संध्याओंका राग (लालिमा) ही हो ॥ १३८ ॥ सूर्यका उदय होते ही समस्त अंधकार नष्ट हो गया, चकवा-चकवियोंका क्लेश दूर हो गया, कमलिनी विकसित हो गई और सारा जगत् प्रकाशमान हो गया ॥ १३९ ॥ अब प्रभातके समय फूले हुए कमलिनियोंके वनसे कमलोंकी सुगन्ध ग्रहण करता हुआ यह शीतल पवन सब ओर बह रहा है ॥ १४० ॥ इसलिए हे देवि, स्पष्ट ही यह तेरे जागनेका समय आ गया है। अतएव जिस प्रकार हंसिनी बालूके टीलेको छोड़ देती है उसी प्रकार तू भी अब अपनी निर्मल शय्या छोड़ ॥ १४१ ॥ तेरा प्रभात सदा मंगलमय हो, तू सैकड़ों कल्याणोंको प्राप्त हो और जिस प्रकार पूर्व दिशा सूर्यको उत्पन्न करती है उसी प्रकार तू भी तीन लोकको प्रकाशित करनेवाले पुत्रको उत्पन्न कर ॥ १४२ ॥ यद्यपि वह मरुदेवी स्वप्न देखनेके कारण, बन्दीजनोंके मंगल-गानसे बहुत पहले ही जाग चुकी थी, तथापि उन्होंने उसे फिरसे जगाया। इस प्रकार जागृत होकर उसने समस्त संसारको आनंदमय देखा ॥ १४३ ॥ शुभ स्वप्न देखनेसे जिसे अत्यन्त आनन्द हो रहा है ऐसी जागी हुई मरुदेवी फूली हुई कमलिनीके समान कंटकित अर्थात् रोमांचित (पक्षमें काँटोंसे व्याप्त) शरीर धारण कर रही थी ॥ १४४ ॥

---

१ –खण्डे अ०, म०, द०, स०, ल० । २ विकसनशीलम् । ३ विधुत स०, ल० । ४ उदयेन । ५ प्रकाशितम् । ६ आवाति । ७ शोभनं प्रातःकल्यं यस्याह्नः तत् । ८ 'षू प्राणिप्रसवे' लिङ् । ९ –निर्भरा ल० ।

ततस्तद्दर्शनानन्दं वोढुं स्वाङ्गेष्विवाक्षमा । कृतमङ्गलनेपथ्या सा भेजे पत्युरन्तिकम् ॥१४५॥
उचितेन नियोगेन दृष्ट्वा सा नाभिभूभुजम् । तस्मै नृपासनस्थाय सुखासीना व्यजिज्ञपत् ॥१४६॥
देवाद्य यामिनीभागे पश्चिमे सुखनिद्रिता । अद्राक्षं षोडश स्वप्नान् इमानत्यद्भुतोदयान् ॥१४७॥
गजेन्द्रमवदाताङ्गं वृषभं[1] दुन्दुभिस्वनम् । सिंहमुल्लङ्घिताद्र्यग्रं लक्ष्मीं स्नाप्यां सुरद्विपैः ॥१४८॥
दामनी लम्बमाने खे शीतांशुं द्योतिताम्बरम् । प्रोद्यन्तमब्जिनीबन्धुं बन्धुरं झषयुग्मकम् ॥१४९॥
कलशावमृतापूर्णौ सरः स्वच्छाम्बु साम्बुजम् । वाराशिं क्षुभितावर्त्तं सैंहं भासुरमासनम् ॥१५०॥
विमानमापतत् स्वर्गाद् भुवो[2] भवनमुद्भवत् । रत्नराशिं स्फुरद्रश्मिं ज्वलनं प्रज्वलद्द्युतिम् ॥१५१॥
दृष्ट्वैतान् षोडशस्वप्नान् अथाद्राक्षं[3] महीपते । वदनं मे विशन्तं तं गवेन्द्रं कनकच्छविम् ॥१५२॥
वदैतेषां फलं देव शुश्रूषा मे विवर्द्धते । अपूर्वदर्शनात् कस्य न स्यात् कौतुकवन्मनः ॥१५३॥
अथासाववधिज्ञानविबुद्धस्वप्नसत्फलः । प्रोवाच तत्फलं देव्यै लसद्दशनदीधितिः ॥१५४॥
शृणु देवि महान् पुत्रो भविता ते गजेक्षणात् । समस्तभुवनज्येष्ठो महावृषभदर्शनात् ॥१५५॥
सिंहेनानन्तवीर्योऽसौ दाम्ना सद्धर्मतीर्थकृत् । लक्ष्म्याभिषेकमाप्तासौ[4] मेरोर्मूर्ध्नि सुरोत्तमैः ॥१५६॥
पूर्णेन्दुना जनाह्लादी भास्वता भास्वरद्युतिः । कुम्भाभ्यां निधिभागी स्यात् सुखी मत्स्ययुगेक्षणात् ॥१५७॥
सरसा लक्षणोद्भासी सोऽब्धिना केवली भवेत् । सिंहासनेन साम्राज्यम् अवाप्स्यति जगद्गुरुः ॥१५८॥

तदनन्तर वह मरुदेवी स्वप्न देखनेसे उत्पन्न हुए आनन्दको मानो अपने शरीरमें धारण करनेके लिये समर्थ नहीं हुई थी इसीलिये वह मंगलमय स्नान कर और वस्त्राभूषण धारण कर अपने पतिके समीप पहुंची ॥ १४५ ॥ उसने वहाँ जाकर उचित विनयसे महाराज नाभिराजके दर्शन किये और फिर सुखपूर्वक बैठकर, राज्यसिंहासनपर बैठे हुए महाराजसे इस प्रकार निवेदन किया ॥१४६॥ हे देव, आज मैं सुखसे सो रही थी, सोते ही सोते मैंने रात्रिके पिछले भागमें आश्चर्यजनक फल देनेवाले ये सोलह स्वप्न देखे हैं ॥ १४७ ॥ स्वच्छ और सफेद शरीर धारण करनेवाला ऐरावत हाथी, दुन्दुभिके समान शब्द करता हुआ बैल, पहाड़की चोटीको उल्लंघन करनेवाला सिंह, देवोंके हाथियों द्वारा नहलायी गई लक्ष्मी, आकाशमें लटकती हुई दो मालाएँ, आकाशको प्रकाशमान करता हुआ चन्द्रमा, उदय होता हुआ सूर्य, मनोहर मछलियोंका युगल, जलसे भरे हुए दो कलश, स्वच्छ जल और कमलोंसे सहित सरोवर, क्षुभित और भंवरसे युक्त समुद्र, देदीप्यमान सिंहासन, स्वर्गसे आता हुआ विमान, पृथिवीसे प्रकट होता हुआ नागेन्द्रका भवन, प्रकाशमान किरणोंसे शोभित रत्नोंकी राशि और जलती हुई देदीप्यमान अग्नि। इन सोलह स्वप्नोंको देखनेके बाद हे राजन्, मैंने देखा है कि एक सुवर्णके समान पीला बैल मेरे मुखमें प्रवेश कर रहा है। हे देव, आप इन स्वप्नोंका फल कहिये। इनके फल सुननेकी मेरी इच्छा निरन्तर बढ़ रही है सो ठीक ही है अपूर्व वस्तुके देखनेसे किसका मन कौतुक-युक्त नहीं होता है ? ॥ १४८-१५३ ॥ तदनन्तर, अवधिज्ञानके द्वारा जिन्होंने स्वप्नोंका उत्तम फल जान लिया है और जिनकी दाँतोंकी किरणें अतिशय शोभायमान हो रही हैं ऐसे महाराज नाभिराज मरुदेवीके लिये स्वप्नोंका फल कहने लगे ॥ १५४ ॥ हे देवि, सुन, हाथीके देखनेसे तेरे उत्तम पुत्र होगा, उत्तम बैलके देखनेसे वह समस्त लोकमें ज्येष्ठ होगा ॥ १५५ ॥ सिंहके देखनेसे वह अनन्त बलसे युक्त होगा, मालाओंके देखनेसे समीचीन धर्मके तीर्थ (आम्नाय) का चलानेवाला होगा, लक्ष्मीके देखनेसे वह सुमेरु पर्वतके मस्तकपर देवोंके द्वारा अभिषेकको प्राप्त होगा ॥१५६॥ पूर्ण चन्द्रमाके देखनेसे समस्त लोगोंको आनन्द देनेवाला होगा, सूर्यके देखनेसे देदीप्यमान प्रभाका धारक होगा, दो कलश देखनेसे अनेक निधियोंको प्राप्त होगा, मछलियोंका युगल देखनेसे सुखी होगा ॥१५७॥ सरोवरके देखनेसे अनेक लक्षणोंसे शोभित होगा, समुद्रके देखनेसे केवली

१ वृषं दुन्दुभिनिःस्वनम् अ०, प०, स०, द०, म०, ल० । २ भूमेः सकाशात् । ३ आगात्स्यम् ।
४ प्राप्स्यति । —माप्तोऽसौ अ०, प०, स०, म०, ल० ।

स्वर्विमानावलोकेन स्वर्गादवतरिष्यति । फणीन्द्रभवनालोकात् सोऽवधिज्ञानलोचनः ॥१५९॥
गुणानामाकरः प्रोद्यद्रत्नराशिनिशामनात्[1] । [2]कर्मेन्धन[3]धगप्येष निर्धूमज्वलनेक्षणात् ॥१६०॥
वृषभाकारमादाय [4]भवत्यास्यप्रवेशनात् । त्वद्गर्भे वृषभो देवः [5]स्वमाधास्यति[6] निर्मले ॥१६१॥
इति तद्वचनाद् देवी [7]दधे रोमाञ्चितं वपुः । हर्षाङ्कुरैरिवाकीर्णं परमानन्दनिर्भरम् ॥१६२॥
[8]तदाप्रभृति सुत्रामशासनात्ताः सिषेविरे । दिक्कुमार्योऽनुचारिण्यः[9] तत्कालोचितकर्मभिः ॥१६३॥

होगा, सिंहासनके देखनेसे जगत्का गुरु होकर साम्राज्यको प्राप्त करेगा ॥ १५८ ॥ देवोंका विमान देखनेसे वह स्वर्गसे अवतीर्ण होगा, नागेन्द्रका भवन देखनेसे अवधि-ज्ञान रूपी लोचनोंसे सहित होगा ॥१५९॥ चमकते हुए रत्नोंकी राशि देखनेसे गुणोंकी खान होगा, और निर्धूम अग्निके देखनेसे कर्मरूपी इंधनको जलानेवाला होगा ॥१६०॥ तथा तुम्हारे मुखमें जो वृषभने प्रवेश किया है उसका फल यह है कि तुम्हारे निर्मल गर्भमें भगवान् वृषभदेव अपना शरीर धारण करेंगे ॥१६१॥ इस प्रकार नाभिराजके वचन सुनकर उसका सारा शरीर हर्षसे रोमांचित हो गया जिससे ऐसा जान पड़ता था मानो परम आनन्दसे निर्भर होकर हर्षके अंकुरोंसे ही व्याप्त हो गया हो ॥१६२॥ [*जब अवसर्पिणी कालके तीसरे सुषम दुःषम नामक कालमें चौरासी लाख पूर्व तीन वर्ष आठ माह और एक पक्ष बाकी रह गया था तब आषाढ़ कृष्ण द्वितीयाके दिन उत्तराषाढ़ नक्षत्रमें वज्रनाभि अहमिन्द्र, देवायुका अन्त होनेपर सर्वार्थसिद्धि विमानसे च्युत होकर मरुदेवीके गर्भमें अवतीर्ण हुआ और वहां सीपके संपुटमें मोतीकी तरह सब बाधाओंसे निर्मुक्त होकर स्थित हो गया ॥१-३॥ उस समय समस्त इन्द्र अपने अपने यहाँ होनेवाले चिह्नोंसे भगवान्के गर्भावतारका समय जानकर वहाँ आये और सभीने नगरकी प्रदक्षिणा देकर भगवान्के माता-पिताको नमस्कार किया ॥४॥ सौधर्म स्वर्गके इन्द्रने देवोंके साथ साथ संगीत प्रारम्भ किया । उस समय कहीं गीत हो रहे थे, कहीं बाजे बज रहे थे और कहीं मनोहर नृत्य हो रहे थे ॥५॥ नाभिराजके महलका आंगन स्वर्गलोकसे आये हुए देवोंके द्वारा खचाखच भर गया था । इस प्रकार गर्भकल्याणकका उत्सव कर वे देव अपने अपने स्थानोंपर वापिस चले गये ॥६॥] उसी समयसे लेकर इन्द्रकी आज्ञासे दिक्कुमारी देवियाँ उस समय होने योग्य कार्योंके द्वारा दासियोंके समान मरुदेवीकी सेवा करने लगीं ॥१६३॥

१ दर्शनात् । २ कर्मेन्धनहरोऽप्येष अ०, प० । ३ कर्मेन्धनदाही । ४ भवत्यास्य तव मुखं । ५ स्वम् आत्मानम् । ६ धारयिष्यति । ७ दध्रे प० । ८ १६२श्लोकादनन्तरम् अ०, प०, स०, द०, म०, ल० पुस्तकेष्वधस्तनः पाठोऽधिको दृश्यते । अयं पाठः 'त० ब०' पुस्तकयोर्नास्ति । प्रायेणान्येष्वपि कर्णाटकपुस्तकेषु नास्त्ययं पाठः । कर्णाटकपुस्तकेष्वज्ञातेन केनचित् कारणेन त्रुटितोऽप्ययं पाठः प्रकरणसङ्गत्यर्थमावश्यकः प्रतिभाति । स च पाठ ईदृशः—'तृतीयकालशेषेऽसावशीतिश्चतुरुत्तरा । पूर्वलक्षास्त्रिवर्गाष्टमासपक्षयुतास्तदा ॥१॥ अवतीर्य युगाद्यन्ते ह्यखिलार्थविमानतः । आषाढासितपक्षस्य द्वितीयायां सुरोत्तमः ॥२॥ उत्तराषाढनक्षत्रे देव्या गर्भं समाश्रितः । स्थितो यथा विबाधोऽसौ मौक्तिकं शुक्तिसम्पुटे ॥३॥ ज्ञात्वा तदा स्वचिह्नेन सर्वेऽप्यागुः सुरेश्वराः । पुरुं प्रदक्षिणीकृत्य तद्गुरूंश्च ववन्दिरे ॥४॥ सङ्गीतकं समारब्धं वज्रिणा हि सहामरैः । क्वचिद्गीतं क्वचिद्वाद्यं क्वचिन्नृत्यं मनोहरम् ॥५॥ तत्प्राङ्गणं समाक्रान्तं नाकलोकैरिहागतैः । कृत्वा गर्भककल्याणं पुनर्जग्मुर्यथायथम् ॥६॥ अयं पाठः 'प' पुस्तकस्थः । 'द' पुस्तके द्वितीयश्लोकस्य 'युगाद्यन्ते' इत्यस्य स्थाने 'सुरायन्ते' इति पाठो विद्यते तस्य सिद्धिश्च संस्कृतटीकाकारेण शकन्ध्वादित्वात् पररूपं विधाय विहिता । 'अ०, स०' पुस्तकयोर्निम्नाङ्कितः पाठोऽस्ति प्रथमद्वितीयश्लोकस्थाने— 'पूर्वलक्षेषु कालेऽसौ शेषे चतुरशीतिके । तृतीये हि त्रिवर्षाष्टमासपक्षयुते सति ॥१॥ आयुरन्ते ततश्च्युत्वा ह्यखिलार्थविमानतः । आषाढासितपक्षस्य द्वितीयायां सुरोत्तमः ॥२॥) ९ चेट्यः ।

* कोष्ठकके भीतरका पाठ अ०, प०, द०, स०, म० और ल० प्रतिके आधारपर दिया है। कर्णाटककी 'त०' 'ब०' तथा 'ट' प्रतिमें यह पाठ नहीं पाया जाता है ।

श्रीह्रीर्धृतिश्च कीर्तिश्च बुद्धिलक्ष्म्यौ च देवताः । श्रियं लज्जां च धैर्यं च स्तुतिबोधं च वैभवम् ॥१६४॥
तस्यामादधुरभ्यर्णवर्तिन्यः स्वानिमान् गुणान् । तत्संस्काराच्च सा रेजे संस्कृतेवाग्निना मणिः ॥१६५॥
तास्तस्याः परिचर्यायां गर्भशोधनमादितः । प्रचक्रुः शुचिभिर्द्रव्यैः स्वर्गलोकादुपाहृतैः[1] ॥१६६॥
स्वभावनिर्मला चार्वी भूयस्ताभिर्विशोधिता । सा शुचिस्फटिकेनेव घटिताङ्गी तदा बभौ ॥१६७॥
काश्चिन्मङ्गलधारिण्यः काश्चित्ताम्बूलदायिकाः । काश्चिन्मज्जनपालिन्यः काश्चिच्चासन्[2] प्रसाधिकाः ॥१६८॥
काश्चिन्महानसे युक्ताः शय्याविरचने पराः । [3]पादसंवाहने काश्चित् काश्चिन्माल्यैरुपाचरन्[4] ॥१६९॥
[5]प्रसाधनविधौ काचित् स्पृशन्ती तन्मुखाम्बुजम् । सानुरागं व्यधात् सौरी[6] प्रभेवाब्जं [7]सरोरुहः ॥१७०॥
ताम्बूलदायिका[8] काचिद् बभौ पत्रैः करस्थितैः । शुकाध्यासितशाखाग्रा लतेवामरकामिनी ॥१७१॥
काचिदाभरणान्यस्यै ददती मृदुपाणिना । विबभौ कल्पवल्लीव शाखाग्रोद्भिन्न[9] भूषणाः ॥१७२॥
वासः क्षौमं[10] स्रजो दिव्याः सुमनोमञ्जरीरपि । तस्यै समर्पयामासुः काश्चित् कल्पलता इव ॥१७३॥
काचिन् [11]सौगन्धिकाहूतद्विरेफैरनुलेपनैः । स्वकरस्थैः कृतामोदाद् [12]गन्धैर्युक्तिरिवारुचत् ॥१७४॥

श्री, ह्री, धृति, कीर्ति, बुद्धि और लक्ष्मी इन षट्कुमारी देवियोंने मरुदेवीके समीप रहकर उसमें क्रमसे अपने अपने शोभा, लज्जा, धैर्य, स्तुति, बोध और विभूति नामक गुणोंका संचार किया था। अर्थात् श्री देवीने मरुदेवीकी शोभा बढ़ा दी, ह्री देवीने लज्जा बढ़ा दी, धृति देवीने धैर्य बढ़ाया, कीर्ति देवीने स्तुति की, बुद्धि देवीने बोध (ज्ञान)को निर्मल कर दिया और लक्ष्मी देवीने विभूति बढ़ा दी। इस प्रकार उन देवियोंके सेवा-संस्कारसे वह मरुदेवी ऐसी सुशोभित होने लगी थी जैसे कि अग्निके संस्कारसे मणि सुशोभित होने लगता है ॥१६४-१६५॥ परिचर्या करते समय देवियोंने सबसे पहले स्वर्गसे लाये हुए पवित्र पदार्थोंके द्वारा माताका गर्भ शोधन किया था। ॥१६६॥ वह माता प्रथम तो स्वभावसे ही निर्मल और सुन्दर थी इतनेपर देवियोंने उसे विशुद्ध किया था। इन सब कारणोंसे वह उस समय ऐसी शोभायमान होने लगी थी मानो उसका शरीर स्फटिक मणिसे ही बनाया गया हो ॥१६७॥ उन देवियोंमें कोई तो माताके आगे अष्ट मङ्गल द्रव्य धारण करती थीं, कोई उसे ताम्बूल देती थीं, कोई स्नान कराती थीं और कोई वस्त्राभूषण आदि पहिनाती थीं ॥१६८॥ कोई भोजनशालाके काममें नियुक्त हुईं, कोई शय्या बिछाने के काममें नियुक्त हुईं, कोई पैर दाबनेके काममें नियुक्त हुईं और कोई तरह तरहकी सुगन्धित पुष्पमालाएं पहिनाकर माताकी सेवा करनेमें नियुक्त हुईं ॥१६९॥ जिस प्रकार सूर्यकी प्रभा कमलिनीके कमलका स्पर्श कर उसे अनुरागसहित (लाली सहित) कर देती है उसी प्रकार वस्त्राभूषण पहिनाते समय कोई देवी मरुदेवीके मुखका स्पर्श कर उसे अनुरागसहित (प्रेम सहित) कर रही थी ॥१७०॥ ताम्बूल देनेवाली देवी हाथमें पान लिये हुए ऐसी सुशोभित होती थी मानो जिसकी शाखाके अग्रभागपर तोता बैठा हो ऐसी कोई लता ही हो ॥१७१॥ कोई देवी अपने कोमल हाथसे माताके लिये आभूषण दे रही थी जिससे वह ऐसी शोभायमान हो रही थी मानो जिसकी शाखाके अग्रभागपर आभूषण प्रकट हुए हों ऐसी कल्पलता ही हो ॥१७२॥ मरुदेवीके लिये कोई देवियां कल्पलताके समान रेशमी वस्त्र दे रही थीं, कोई दिव्य मालाएँ दे रही थीं ॥१७३॥ कोई देवी अपने हाथपर रखे हुए सुगन्धित द्रव्योंके विलेपनसे मरुदेवीके शरीरको सुवासित कर रही थी। विलेपनकी सुगन्धिके

१ आनीतैः । २ अलङ्कारे नियुक्ताः । ३ पादमर्दने । ४ उपचारमकुर्वन् । ५ अलङ्कारविधाने । ६ सूर्यस्येयं सौरी । ७ सरोजिन्याः । सरोवरे प० । —वाब्जं सरोरुहम् म० । —वाब्जसरोरुहम् अ० । ८ ताम्बूलदायिनी द०, स०, म०, ल० । ९ उद्भिन्न उद्भूत । १० दुकूलम् । ११ सौगन्धिकाः सौगन्ध्याः । सौगन्धिकाहूत सुगन्धसमूहाहूत । 'क्वचिद्धस्त्यचित्ताच्च ठणीति ठणि' अथवा 'सुगन्धाहूतविनयादिभ्यः' इति स्वार्थे ठण् । १२ गन्धसमृद्धिः । गन्धद्रव्यकरणप्रतिपादकशास्त्रविशेषः ।

अङ्गरक्षाविधौ काश्चित् उत्खातासिलता बभुः । सरस्य इव विग्रस्तपाठीनाः सुरयोषितः ॥१७५॥
संममार्जु र्महीं काश्चिद् आकीर्णां पुष्परेणुभिः । तद्गन्धासङ्गिनो भृङ्गान् आधुनानास्तनांशुकैः ॥१७६॥
कुर्वन्ति स्मापराः सान्द्रचन्दनच्छटयोक्षिताम्[1] । क्षितिमार्द्रांशुकैरन्या निर्ममार्जु रतन्द्रिताः ॥१७७॥
कुर्वते [2]बलिविन्यासं रत्नचूर्णैः पुरोऽपराः । पुष्पैरुपहरन्त्यन्याः ततामोदैद्रु[3]शाखिनाम्[4] ॥१७८॥
काश्चिद्दर्शितदिव्यानुभावाः [5]प्रच्छन्नविग्रहाः । नियोगैरुचितैरेनाम् अनारतमुपाचरन् ॥१७९॥
प्रभातरलितां काश्चिद् दधानास्तनुयष्टिकाम् । सौदामिन्य इवानिन्युः उचितं रुचितं च यत् ॥१८०॥
काश्चिदन्तर्हिता[5] देव्यो देव्यै दिव्यानुभावतः । स्रजमंशुकमाहारं भूषां चास्यै समर्पयन् ॥१८१॥
अन्तरिक्षस्थिताः काश्चिद् अनालक्षितमूर्तयः । यत्नेन रक्ष्यतां देवीत्युच्चैर्गिरमुदाहरन्[6] ॥१८२॥
[7]गतेष्वंशुकसंधानम्[8] [9]आसितेष्वासना[10]हृतिम् । [11]स्थितेषु परितः सेवां चक्रुरस्याः सुराङ्गनाः ॥१८३॥
काश्चिदुच्चिक्षु[12]पुर्ज्योतिः तरला मणिदीपिकाः । निशामुखेषु [13]हर्म्याग्राद् विधुन्वानास्तमोऽभितः ॥१८४॥
काश्चिन्नीराजयामासुः उचितैर्बलिकर्मभिः । [14]न्यास्थन्मन्त्राक्षरैः काश्चिद् अस्यै रक्षामुपाक्षिपन्[15] ॥१८५॥

कारण उस देवीके हाथपर अनेक भौंरे आकर गुंजार करते थे जिससे वह ऐसी मालूम होती थी मानो सुगन्धित द्रव्योंकी उत्पत्ति आदिका वर्णन करनेवाले गन्धशास्त्रकी युक्ति ही हो ॥१७४॥ माताकी अंग-रक्षाके लिए हाथमें नंगी तलवार धारण किये हुई कितनी ही देवियां ऐसी शोभायमान होती थीं मानो जिनमें मछलियाँ चल रही हैं ऐसी सरसी (तलैया) ही हों ॥१७५॥ कितनी ही देवियाँ पुष्पकी परागसे भरी हुई राजमहलकी भूमिको बुहार रही थीं और उस पराग की सुगन्ध से आकर इकट्ठे हुए भौंरोंको अपने स्तन ढकनेके वस्त्रसे उड़ाती भी जाती थीं ॥१७६॥ कितनी ही देवियाँ आलस्यरहित होकर पृथिवीको गीले कपड़ेसे साफ कर रही थीं और कितनी ही देवियाँ घिसे हुए गाढ़े चन्दनसे पृथिवीको सींच रहीं थीं ॥१७७॥ कोई देवियां माताके आगे रत्नोंके चूर्णसे रंगावलीका विन्यास करती थीं—रंग विरंगे चौक पूरती थीं, बेल-बूटा खींचती थीं और कोई सुगन्धि फैलानेवाले, कल्पवृक्षोंके फूलोंसे माताकी पूजा करती थीं—उन्हें फूलोंका उपहार देती थीं ॥१७८॥ कितनी ही देवियां अपना शरीर छिपाकर दिव्य प्रभाव दिखलाती हुई योग्य सेवाओंके द्वारा निरन्तर माताकी शुश्रूषा करती थीं ॥१७९॥ बिजलीके समान प्रभासे चमकते हुए शरीरको धारण करनेवाली कितनी ही देवियां माताके योग्य और अच्छे लगनेवाले पदार्थ लाकर उपस्थित करती थीं ॥१८०॥ कितनी ही देवियां अन्तर्हित होकर अपने दिव्य प्रभावसे माताके लिये माला, वस्त्र, आहार और आभूषण आदि देती थीं ॥१८१॥ जिनका शरीर नहीं दिख रहा है ऐसी कितनी ही देवियाँ आकाशमें स्थित होकर बड़े जोरसे कहती थीं कि माता मरुदेवीकी रक्षा बड़े ही प्रयत्नसे की जावे ॥१८२॥ जब माता चलती थीं तब वे देवियां उसके वस्त्रोंको कुछ ऊपर उठा लेती थीं, जब बैठती थीं तब आसन लाकर उपस्थित करती थीं और जब खड़ी होती थीं तब सब ओर खड़ी होकर उनकी सेवा करती थीं ॥१८३॥ कितनी ही देवियां रात्रिके प्रारम्भकालमें राजमहलके अग्रभागपर अतिशय चमकीले मणियोंके दीपक रखती थीं। वे दीपक सब ओरसे अंधकारको नष्ट कर रहे थे ॥१८४॥ कितनी ही देवियां सायंकालके समय योग्य वस्तुओंके द्वारा माताकी आरती उतारती थीं, कितनी ही देवियां दृष्टिदोष दूर करनेके लिये उतारना उतारती थीं और कितनी ही

---

१ प्रोक्षिताम्, सिक्तामित्यर्थः । २ रङ्गवलिरचनाम् । ३ कल्पवृक्षाणाम् । ४ मनुष्यदेहधारिणः । ५ अन्तर्धानं गताः । ६ वदन्ति स्म । ७ गमनेषु । ८ वस्त्रप्रसरणम् । ९ उपवेशनेषु । १० पीठानयनम् । ११ स्थानेषु । १२ ज्वालयन्ति स्म । १३ प्रासादाग्रमारुह्य । १४ न्यसन्ति स्म । १५ निक्षिपन्ति स्मेत्यर्थः । —गुणक्षयम् द०, स०, म०, ट० । उपक्षपं रात्रिमुखे ।

नित्यजागरितैः काश्चित् निमेषालसलोचनाः[1] । उपासाञ्चक्रिरे[2] नक्तं[3] तां देव्यो विधृतायुधाः ॥१८६॥
कदाचिज्जलकेलीभिः वनक्रीडाभिरन्यदा । कथागोष्ठीभिरन्येद्युः देव्यस्तस्यै धृतिं दधुः ॥१८७॥
कदाचिद्गीतगोष्ठीभिः वाद्यगोष्ठीभिरन्यदा । कर्हिचिन्नृत्यगोष्ठीभिः देव्यस्तां पर्युपासत[4] ॥१८८॥
काश्चित्प्रेक्षणगोष्ठीषु[5] सलीलानर्तितभ्रुवः । वर्धमानलयैर्नेटुः[6] साङ्गहाराः[7] सुराङ्गनाः ॥१८९॥
काश्चिन्नृत्तविनोदेन[8] रेजिरे कृतरेचकाः[9] । नभोरङ्गे[10] विलोलाङ्ग्यः सौदामिन्य इवोद्रुचः[11] ॥१९०॥
काश्चिदारचितैस्स्थानैः बभुर्विक्षिप्तबाहवः । शिक्षमाणा इवानङ्गाद् धनुर्वेदं[12] जगज्जये ॥१९१॥
पुष्पाञ्जलिं किरन्त्येका[13] परितो रङ्गमण्डलम् । मदनग्रहमावेशं योक्तुकामेव लक्षिता ॥१९२॥
तदुरोजसरोजातमुकुलानि चकम्पिरे । [14]अनुनर्तितुमेतासामिव नृत्तं कुतूहलात् ॥१९३॥
अपाङ्गशरसन्धानैः भ्रूलताचापकर्षणैः । [15]धनुर्गुणनिकेवासीत् नृत्तगोष्ठी मनोभुवः ॥१९४॥
स्मितसुच्छिन्नदन्तांशु पाठ्यं कलमनाकुलम् । सापाङ्गवीक्षितं चक्षु सलयश्च [16]परिक्रमः ॥१९५॥
इतीदमन्यदप्यासां[17] धत्तेऽनङ्गशराङ्गताम् । किमङ्गं सङ्गतं[18] भावैः[19] आङ्गिकैरमतां[20] गतैः ॥१९६॥

देवियां मन्त्राक्षरोंके द्वारा उसका रक्षाबन्धन करती थीं ॥१८५॥ निरन्तरके जागरणसे जिनके नेत्र टिमकाररहित हो गये हैं ऐसी कितनी ही देवियां रातके समय अनेक प्रकारके हथियार धारण कर माताकी सेवा करती थीं अथवा उनके समीप बैठकर पहरा देती थीं ॥१८६॥ वे देवांगनाएं कभी जलक्रीडासे और कभी वनक्रीडासे, कभी कथा-गोष्ठीसे (इकट्ठे बैठकर कहानी आदि कहनेसे) उन्हें सन्तुष्ट करती थीं ॥१८७॥ वे कभी संगीतगोष्ठीसे, कभी वादित्र-गोष्ठीसे और कभी नृत्यगोष्ठीसे उनकी सेवा करती थीं ॥१८८॥ कितनी ही देवियां नेत्रोंके द्वारा अपना अभिप्राय प्रकट करनेवाली गोष्ठियोंमें लीलापूर्वक भौंह नचाती हुई और बढ़ते हुए तालके साथ शरीरको लचकाती हुई नृत्य करती थीं ॥१८९॥ कितनी ही देवियां नृत्यक्रीडाके समय आकाशमें जाकर फिरकी लेती थीं और वहां अपने चंचल अंगों तथा शरीरकी उत्कृष्ट कान्तिसे ठीक बिजलीके समान शोभायमान होती थीं ॥ १९० ॥ नृत्य करते समय नाट्य-शास्त्रमें निश्चित किये हुए स्थानोंपर हाथ फैलाती हुई कितनी ही देवियाँ ऐसी मालूम होती थीं मानो जगत्को जीतनेके लिये साक्षात् कामदेवसे धनुर्वेद ही सीख रही हों ॥ १९१ ॥ कोई देवी रंग-बिरंगे चौकके चारों ओर फूल बिखेर रही थी और उस समय वह ऐसी मालूम होती थी मानो चित्र-शालामें कामदेवरूपी ग्रहको नियुक्त ही करना चाहती हो ॥ १९२ ॥ नृत्य करते समय उन देवांगनाओंके स्तनरूपी कमलोंकी बोंड़ियाँ भी हिल रही थीं जिससे ऐसी जान पड़ती थीं मानो उन देवांगनाओंके नृत्यका कौतूहलवश अनुकरण ही कर रही हों ॥ १९३ ॥ देवांगनाओंकी उस नृत्यगोष्ठीमें बार बार भौंहरूपी चाप खींचे जाते थे और उनपर बार बार कटाक्षरूपी बाण चढ़ाये जाते थे जिससे वह ऐसी मालूम होती थी मानो कामदेवकी धनुष विद्याका किया हुआ अभ्यास ही हो ॥ १९४ ॥ नृत्य करते समय वे देवियां दाँतोंकी किरणें फैलाती हुई मुस्कराती जाती थीं, स्पष्ट और मधुर गाना गाती थीं, नेत्रोंसे कटाक्ष करती हुई देखती थीं और लयके साथ फिरकी लगाती थीं, इस प्रकार उन देवियोंका वह नृत्य तथा हाव-भाव आदि अनेक प्रकारके विलास, सभी कामदेवके बाणोंके सहायक बाण मालूम होते थे और रसिकताको प्राप्त हुई शरीर-सम्बन्धी चेष्टाओंसे मिले हुए उनके शरीरका तो कहना ही क्या है—वह तो हरएक

१ निमेषालस– निर्निमेष । २ सेवां चक्रुः । ३ रजन्याम् । ४ सेवां चक्रिरे । ५ प्रेक्षण–समुदायनृत्य । ६ ताललयैः । ७ अङ्गविक्षेपसहिताः । ८ –विनोदेषु अ०, प०, म०, स०, द०, ल० । ९ कृतवल्गनाः । १० नभोभागे अ०, म०, द०, स० । ११ उद्गतप्रभाः । १२ चापविद्याम् । १३ किरत्येका अ०, म० । १४ अनुवर्तितु– प०, द०, म०, ल० । १५ अभ्यासः । १६ पादविक्षेपः । १७ इतीदम-न्यथाप्यासां प०, अ०, द०, स० । १८ संयुक्तं चेत् । १९ चेष्टितैः । २० रसिकत्वम् ।

[1]चारिभिः करणैश्चित्रैः[2] साङ्गहारैश्च रेचकैः[3]। मनोऽस्याः सुरनर्त्तक्यश्चक्रुः संप्रेक्षणोत्सुकम् ॥१९७॥
काश्चित् सङ्गीतगोष्ठीषु [4]दरोद्भिन्नस्मितैर्मुखैः। बभुः पद्मैरिवाब्जिन्यो विरलोद्भिन्नकेसरैः ॥१९८॥
काश्चिदोष्ठाग्रसंदष्टवेणवोऽणुभ्रुवो बभुः। मदनाग्निमिवाध्मातुं[5] कृतयत्नाः सफूत्कृतम् ॥१९९॥
वेणुध्मा[6] वैणवीं[7] यष्टीर्मार्जन्त्यः करपल्लवैः। चित्रं पल्लवितांश्चक्रुः प्रेक्षकाणां मनोद्रुमान् ॥२००॥
सङ्गीतकविधौ काश्चित् स्पृशन्त्यः[8] परिवादिनीः[9]। कराङ्गुलीभिरातेनुः गानमामन्द्रमूर्च्छनाः ॥२०१॥
तन्त्र्यो मधुरमारेणुः[10] तत्कराङ्गुलिताडिताः। अयं तान्त्रो[11] गुणः कोऽपि ताडनाद् याति यद्वशम् ॥२०२॥
वंशैः संदष्टमालोक्य तासां तु दशनच्छदम्। वीणालाबुभि[12]राश्लेषि घनं तत्स्तनमण्डलम् ॥२०३॥
मृदङ्गवादनैः काश्चिद् बभुरुत्क्षिप्तबाहवः। तत्कलाकौशले श्लाघां कर्तुकामा इवात्मनः ॥२०४॥
मृदङ्गास्तत्करस्पर्शात् तदा मन्द्रं विसस्वनुः। तत्कलाकौशलं तासाम् उत्कुर्वाणा[13] इवोच्चकैः ॥२०५॥

प्रकारसे अत्यन्त सुन्दर दिखाई पड़ता था ॥ १९४-१९६ ॥ वे नृत्य करनेवाली देवियाँ अनेक प्रकारकी गति, तरह तरहके गीत अथवा नृत्य विशेष, और विचित्र शरीरकी चेष्टा सहित फिरकी आदिके द्वारा माताके मनको नृत्य देखनेके लिये उत्कण्ठित करती थीं ॥ १९७ ॥ कितनी ही देवांगनाएँ संगीत-गोष्ठियोंमें कुछ कुछ हँसते हुए मुखोंसे ऐसी सुशोभित होती थीं जैसे कुछ कुछ विकसित हुए कमलोंसे कमलिनियाँ सुशोभित होती हैं ॥ १९८ ॥ जिनकी भौंहें बहुत ही छोटी छोटी हैं ऐसी कितनी ही देवियाँ ओठोंके अग्रभागसे वीणा दबाकर बजाती हुई ऐसी शोभायमान हो रही थीं मानो फूँककर कामदेवरूपी अग्निको प्रज्वलित करनेके लिये ही प्रयत्न कर रही हों ॥ १९९ ॥ यह एक बड़े आश्चर्यकी बात थी कि वीणा बजानेवाली कितनी ही देवियाँ अपने हस्तरूपी पल्लवोंसे वीणाकी लकड़ीको साफ करती हुई देखनेवालोंके मनरूपी वृक्षोंको पल्लवित अर्थात् पल्लवोंसे युक्त कर रही थीं। (पक्षमें हर्षित अथवा शृङ्गार रससे सहित कर रही थीं।) भावार्थ—उन देवाङ्गनाओंके हाथ पल्लवोंके समान थे, वीणा बजाते समय उनके हाथरूपी पल्लव वीणाकी लकड़ी अथवा उसके तारोंपर पड़ते थे। जिससे वह वीणा पल्लवित अर्थात् नवीन पत्तोंसे व्याप्त हुई सी जान पड़ती थी परन्तु आचार्यने यहाँपर वीणाको पल्लवित न बताकर देखनेवालोंके मनरूप वृक्षोंको पल्लवित बतलाया है जिससे विरोधमूलक अलंकार प्रकट हो गया है परन्तु पल्लवित शब्दका हर्षित अथवा शृङ्गार रससे सहित अर्थ बदल देनेपर वह विरोध दूर हो जाता है। संक्षेपमें भाव यह है कि वीणा बजाते समय उन देवियोंके हाथोंकी चंचलता, सुंदरता और बजानेकी कुशलता आदि देखकर दर्शक पुरुषोंका मन हर्षित हो जाता था ॥ २०० ॥ कितनी ही देवियाँ संगीतके समय गम्भीर शब्द करनेवाली वीणाओंको हाथकी अँगुलियोंसे बजाती हुई गा रही थीं ॥ २०१ ॥ उन देवियोंके हाथकी अंगुलियोंसे ताड़ित हुई वीणाएं मनोहर शब्द कर रही थीं सो ठीक ही है वीणाका यह एक आश्चर्यकारी गुण है कि ताड़नसे ही वश होती है ॥२०२॥ उन देवांगनाओंके ओठोंको वंशों (बाँसुरी) के द्वारा डसा हुआ देखकर ही मानो वीणाओंके तूंबे उनके कठिन स्तनमण्डलसे आ लगे थे। भावार्थ—वे देवियाँ मुँहसे बाँसुरी और हाथसे वीणा बजा रही थीं ॥ २०३ ॥ कितनी ही देवियाँ मृदङ्ग बजाते समय अपनी भुजाएँ ऊपर उठाती थीं जिससे वे ऐसी मालूम होती थीं मानो उस कला-कौशलके विषयमें अपनी प्रशंसा ही करना चाहती हों ॥ २०४ ॥ उस समय उन बजानेवाली देवियोंके हाथके स्पर्शसे वे मृदंग गम्भीर शब्द कर रहे थे जिससे ऐसे जान पड़ते थे मानो

१ चारुभिः द०, स०। चारिभिः गतिविशेषैः। २ पुष्पघटादिभिः। ३ वल्गनैः। ४ दरोद्भिन्न —ईषदुद्भिन्न। ५ संधुक्षितुम्। ६ वैणविकाः। ७ वेणोरिमाः। ८ —संसृत्य अ०, स०, म०, ल०। ९ सप्ततन्त्री वीणा। 'तन्त्रीभिः सप्तभिः परिवादिनी' इत्यभिधानात्। १० ध्वनन्ति स्म। ११ औषध-सम्बन्धी तन्त्रीसम्बन्धी च। १२ अलाबु —तुम्बी। —लाम्बुभिः प०। १३ उत्कर्षं कुर्वाणाः।

मृदङ्गा[1] न वयं सत्यं पश्यतास्मान् हिरण्मयान् । इतीवारसितं[2] चक्रुः ते मुहुस्तत्कराहताः ॥२०६॥
मुरवाः[3] कुरवा[4] नैते वादनीयाः कृतश्रमम् । इतीव सस्वनुर्मन्द्रं पणवाद्याः सुरानकाः ॥२०७॥
प्रभातमङ्गले काश्चित् शङ्खानाध्मासिपुः[5] पृथून् । [6]स्वकरोत्पीडनं सोढुम् अक्षमानिव सारवान्[7] ॥२०८॥
काश्चित् प्राबोधिकैस्तूर्यैः सममुत्तालतालकैः । जगुः कलं च मन्द्रं च मङ्गलानि सुराङ्गनाः ॥२०९॥
इति तत्कृतया देवी सा बभौ परिचर्यया । त्रिजगच्छ्रीरिवैकध्यम्[8] उपनीता कथञ्चन ॥२१०॥
दिक्कुमारीभिरित्यात्तसंभ्रमं समुपासिता । तत्प्रभावैरिवाविष्टैः[9] सा बभार परां श्रियम् ॥२११॥
[10]अन्तर्वत्नीमथाभ्यर्णे नवमे मासि सादरम् । विशिष्टकाव्यगोष्ठीभिः देव्यस्ताभिरयरञ्जयन् ॥२१२॥
[11]निगूढार्थक्रियापादैः बिन्दुमात्राक्षरच्युतैः[12] । देव्यस्तां रञ्जयामासुः श्लोकैरन्यैश्च कैश्चन ॥२१३॥
किमिन्दुरेको लोकेऽस्मिन् त्वयाम्ब मृदुरीक्षितः । आछिनत्सि बलादस्य यदशेषं[13] कलाधनम् ॥२१४॥

ऊँचे स्वरसे उन बजानेवाली देवियोंके कला-कौशलको ही प्रकट कर रहे हों ॥ २०५ ॥ उन देवियोंके हाथसे बार बार ताड़ित हुए मृदंग मानो यही ध्वनि कर रहे थे कि देखो, हम लोग वास्तवमें मृदंग (मृत् + अङ्ग) अर्थात् मिट्टीके अङ्ग (मिट्टीसे बने हुए) नहीं हैं किन्तु सुवर्णके बने हुए हैं। भावार्थ— मृदङ्ग शब्द रूढ़िसे ही मृदङ्ग (वाद्य विशेष) अर्थको प्रकट करता है ॥ २०६ ॥ उस समय पणव आदि देवोंके बाजे बड़ी गम्भीर ध्वनिसे बज रहे थे मानो लोगोंसे यही कह रहे थे कि हम लोग सदा सुंदर शब्द ही करते हैं, बुरे शब्द कभी नहीं करते और इसी लिये बड़े परिश्रमसे बजाने योग्य हैं ॥२०७॥ प्रातःकालके समय कितनी ही देवियाँ बड़े बड़े शंख बजा रही थीं और वे ऐसे मालूम होते थे मानो उन देवियोंके हाथोंमें होनेवाली पीड़ाको सहन करनेके लिये असमर्थ होकर ही चिल्ला रहे हों ॥ २०८ ॥ प्रातःकालमें माताको जगानेके लिये जो ऊँची तालके साथ तुरही बाजे बज रहे थे उनके साथ कितनी ही देवियाँ मनोहर और गंभीर रूपसे मंगल-गान गाती थीं ॥ २०९ ॥ इस प्रकार उन देवियोंके द्वारा की हुई सेवासे मरुदेवी ऐसी शोभाय-मान होती थीं मानो किसी प्रकार एकरूपताको प्राप्त हुई तीनों लोकोंकी लक्ष्मी ही हो ॥ २१० ॥ इस तरह बड़े संभ्रमके साथ दिक्कुमारी देवियोंके द्वारा सेवित हुई उस मरुदेवीने बड़ी ही उत्कृष्ट शोभा धारण की थी और वह ऐसी मालूम पड़ती थी मानो शरीरमें प्रविष्ट हुए देवियोंके प्रभावसे ही उसने ऐसी उत्कृष्ट शोभा धारण की हो ॥ २११ ॥

अथानन्तर, नौवाँ महीना निकट आनेपर वे देवियां नीचे लिखे अनुसार विशिष्ट विशिष्ट काव्य गोष्ठियोंके द्वारा बड़े आदरके साथ गर्भिणी मरुदेवीको प्रसन्न करने लगीं ॥ २१२ ॥ जिनमें अर्थ गूढ़ है, क्रिया गूढ़ है, पाद (श्लोक चौथा हिस्सा) गूढ़ है अथवा जिनमें बिंदु छूटा हुआ है, मात्रा छूटी हुई या अक्षर छूटा हुआ है ऐसे कितने ही श्लोकोंसे तथा कितने ही प्रकारके अन्य श्लोकोंसे वे देवियां मरुदेवीको प्रसन्न करती थीं ॥ २१३ ॥ वे देवियां कहने लगीं—कि हे माता, क्या तुमने इस संसारमें एक चन्द्रमाको ही कोमल (दुर्बल) देखा है जो इसके समस्त कलारूपी धनको जबरदस्ती छीन रही हो। भावार्थ—इस श्लोकमें व्याजस्तुति अलंकार है अर्थात् निन्दाके छलसे देवीकी स्तुति की गई है। देवियोंके कहनेका अभिप्राय यह है कि आपके मुखकी कान्ति जैसे जैसे बढ़ती जाती है वैसे वैसे ही चन्द्रमाकी कान्ति घटती जाती है अर्थात् आपके कान्तिमान् मुखके सामने चन्द्रमा कान्तिरहित मालूम होने लगा है इससे जान पड़ता है कि आपने चन्द्रमाको दुर्बल समझकर उसके कलारूपी समस्त धनका अपहरण कर लिया है

१ मृण्मयावयवाः । २ ध्वनितम् । ३ मुरजाः । मुरवाः अ०, प०, म०, द०, ल० । ४ कुत्सितरवाः । ५ पूरयन्ति स्म । ६ तत्करोत्पीडनं म०, ल० । ७ आरवेन सहितान् । ८ एकत्वम् । ९ प्रविष्टैः । १० गर्भिणीम् । ११ अर्थाश्च क्रियाश्च पादाश्च अर्थक्रियापादाः निगूढा अर्थक्रियापादा येषु तैः । १२ बिन्दुच्युतकमात्राच्युतकाक्षरच्युतकैः । १३ यत् कारणात् ।

मुखेन्दुना जितं नूनं[1] तवाब्जं[2] सोढुमक्षमम् । बिम्बमप्यैन्दवं साम्यात्[3] सङ्कोचं यात्यदोऽनिशम्[4] ॥२१५॥
राजीवमलिभिजु र्ष्टं सालकेन[5] मुखेन ते । जितं भीरुतयाद्यापि याति साङ्कोचनं[6] मुहुः ॥२१६॥
आजिघ्रन्मुहुरभ्येत्य त्वन्मुखं कमलास्थया[7] । नाभ्यब्जिनीं[8] समभ्येति सशङ्क इव षट्पदः ॥२१७॥
नाभिं[9] पार्थिवमन्वेति नलिनं नलिनानने । [10]त्वन्मुखाब्जमुपाघ्राय कृतार्थोऽयं मधुव्रतः ॥२१८॥
नाभेरभिमतो राज्ञः त्वयि रक्तो न कामुकः । न कुतोऽप्यधरः[11] कान्त्या यः सदोजोधरः[12] स कः ॥२१९॥

[प्रहेलिका]

क कीदृक् शस्यते रेखा तवाणुभ्रू सुविभ्रमे । करिण्याश्च वदान्येन पर्यायेण करेणुका[13] ॥२२०॥

[एकालापकम्]

॥ २१४ ॥ हे माता, आपके मुखरूपी चन्द्रमाके द्वारा यह कमल अवश्य ही जीता गया है क्योंकि इसी लिये वह सदा संकुचित होता रहता है ! कमलकी इस पराजयको चन्द्रमण्डल भी नहीं सह सका है और न आपके मुखको ही जीत सका है इसलिये कमलके समान होनेसे वह भी सदा संकोचको प्राप्त होता रहता है ॥ २१५ ॥ हे माता, चूर्ण कुन्तल सहित आपके मुखकमलने भ्रमर सहित कमलको अवश्य ही जीत लिया है इसीलिये तो वह भयसे मानो आज तक बार बार संकोचको प्राप्त होता रहता है ॥ २१६ ॥ हे माता, ये भ्रमर तुम्हारे मुखको कमल समझ बार बार सन्मुख आकर इसे सूंघते हैं और संकुचित होनेवाली कमलिनीसे अपने मरने आदिकी शंका करते हुए फिर कभी उसके सन्मुख नहीं जाते हैं। भावार्थ—आपका मुख-कमल सदा प्रफुल्लित रहता है और कमलिनीका कमल रातके समय निमीलित हो जाता है। कमलके निमीलित होनेसे भ्रमरको हमेशा उसमें बन्द होकर मरनेका भय बना रहता है। आज उस भ्रमरको सुगन्ध ग्रहण करनेके लिये सदा प्रफुल्लित रहनेवाला आपका मुख कमलरूपी निर्बाध स्थान मिल गया है इसलिये अब वह लौटकर कमलिनीके पास नहीं जाता है ॥ २१७ ॥ हे कमलनयनी ! ये भ्रमर आपके मुखरूपी कमलको सूंघकर ही कृतार्थ हो जाते हैं इसीलिये वे फिर पृथ्वीसे उत्पन्न हुए अन्य कमलके पास नहीं जाते अथवा ये भ्रमर आपके मुखरूपी कमलको सूंघकर कृतार्थ होते हुए महाराज नाभिराजका ही अनुकरण करते हैं। भावार्थ—जिस प्रकार आपका मुख सूंघकर आपके पति महाराज नाभिराज संतुष्ट हो जाते हैं उसी प्रकार ये भ्रमर भी आपका मुख सूंघकर संतुष्ट हो जाते हैं ॥ २१८ ॥ तदनन्तर वे देवियां मातासे पहेलियां पूछने लगीं। एक ने पूछा कि हे माता, बताइये वह कौन पदार्थ है ? जो कि आपमें रक्त अर्थात् आसक्त है और आसक्त होने पर भी महाराज नाभिराजको अत्यंत प्रिय है, कामी भी नहीं है, नीच भी नहीं है, और कांतिसे सदा तेजस्वी रहता है। इसके उत्तरमें माताने कहा कि मेरा 'अधर' (नीचेका ओठ) ही है क्योंकि वह रक्त अर्थात् लाल वर्णका है, महाराज नाभिराजको प्रिय है, कामी भी नहीं है, शरीरके उच्च भागपर रहनेके कारण नीच भी नहीं है और कांतिसे सदा तेजस्वी रहता है * ॥२१९॥ किसी दूसरी देवीने पूछा कि हे पतली भौंहोंवाली और सुन्दर विलासोंसे युक्त माता, बताइये आपके शरीरके किस स्थानमें कैसी रेखा अच्छी समझी जाती है और हस्तिनीका दूसरा नाम क्या है ? दोनों प्रश्नोंका एक ही उत्तर दीजिये।

---

१ अत्यर्थम् । २ कमलं चन्द्रश्च । ३ चन्द्रसादृश्यात् अब्जसादृश्याच्च । ४ अब्जम् इन्दुबिम्बं च । ५ चूर्णकुन्तलसहितेन । ६ सङ्कोचनं ल०, प०, म०, स०, द० । साङ्कोचनं सङ्कोचित्वम् । राजीवं भीरुतया अद्यापि साङ्कोचीनं यातीत्यर्थः । ७ कमलबुद्ध्या । ८ अब्जिन्याः अभिमुखम् । ९ पृथिव्यां भवं नाभिराजं च । १० स्वन्मुखाम्बुजमाघ्राय अ०, प०, ल० । ११ नीचः । १२ सततं तेजोधरः सामर्थ्याल्लभ्योऽधरः । १३ करिणी हस्ते सूक्ष्मरेखा च ।

*इस श्लोकमें अधर शब्द आया है इसलिए इसे 'अंतर्लापिका' भी कह सकते हैं ।

किमाहुः सरलोत्तुङ्ग[1] सच्छायतरुसङ्कुलम् । कलभाषिणि किं कान्तं तवाङ्गे सालकाननम्[2] ॥२२१॥

[एकालापकमेव]

[3]नयनानन्दिनीं रूपसम्पदं ग्लानिमम्बिके । [4]आहाररतिमुत्सृज्य [5]नानाशा[6]नामृतं सति[7] ॥२२२॥

[क्रियागोपितम्]

अधुना[8] दरमुत्सृज्य केसरी गिरिकन्दरम्[9] । [10]समुत्पित्सुर्गिरेरग्रं सटाभारं[11] भयानकम् ॥२२३॥

अधुना[12] जगतस्तापम् अमुना गर्भजन्मना[13] । त्वं देवि जगतामेकपावनी भुवनाम्बिका ॥२२४॥

अधुनामरसर्गस्य[14] वर्द्धतेऽधिकमुत्सवः । [15]अधुनामरसर्गस्य[16] दैत्यचक्रे घटामिति[17] ॥२२५॥

[गूढक्रियमिदं श्लोकत्रयम्]

मातानें उत्तर दिया 'करेणुका *' । भावार्थ—पहले प्रश्नका उत्तर है 'करे + अणुका' अर्थात् हाथमें पतली रेखा अच्छी समझी जाती है और दूसरे प्रश्नका उत्तर है 'करेणुका' अर्थात् हस्तिनीका दूसरा नाम करेणुका है ॥ २२० ॥ किसी देवीने पूछा—हे मधुर-भाषिणी माता, बताओ कि सीधे, ऊँचे और छायादार वृक्षोंसे भरे हुए स्थानको क्या कहते हैं ? और तुम्हारे शरीरमें सबसे सुन्दर अंग क्या है ? दोनोंका एक ही उत्तर दीजिये । माताने उत्तर दिया 'साल-कानन †' अर्थात् सीधे ऊँचे और छायादार वृक्षोंसे व्याप्त स्थानको 'साल-कानन' (सागौन वृक्षोंका वन) कहते हैं और हमारे शरीरमें सबसे सुन्दर अङ्ग 'सालकानन' (स + अलक + आनन) अर्थात् चूर्णकुन्तल [सुगन्धित चूर्ण लगानेके योग्य आगेके बाल—जुल्फें] सहित मेरा मुख है ॥ २२१ ॥ किसी देवीने कहा—हे माता, हे सति, आप आनन्द देनेवाली अपनी रूप-सम्पत्तिको ग्लानि प्राप्त न कराइये और आहारसे प्रेम छोड़कर अनेक प्रकारका अमृत भोजन कीजिये [इस श्लोकमें 'नय' और 'अशान' ये दोनों क्रियाएँ गूढ़ हैं इसलिए इसे क्रियागुप्त कहते हैं] ॥ २२२ ॥ हे माता, यह सिंह शीघ्र ही पहाड़की गुफाको छोड़कर उसकी चोटीपर चढ़ना चाहता है और इसलिए अपनी भयंकर सटाओं (गर्दनपर के बाल—अयाल) हिला रहा है । [इस श्लोकमें 'अधुनात्' यह क्रिया गूढ़ रखी गई है इसलिए यह भी 'क्रियागुप्त' कहलाता है] ॥ २२३ ॥ हे देवि, गर्भसे उत्पन्न होनेवाले पुत्रके द्वारा आपने ही इस जगत्का संताप नष्ट किया है इसलिए आप एकही, जगत्को पवित्र करनेवाली हैं और आपही जगत्की माता हैं । [इस श्लोकमें 'अधुनाः' यह क्रिया गूढ़ है अतः यह भी क्रियागुप्त श्लोक है] ॥ २२४ ॥ हे देवि, इस समय देवोंका उत्सव अधिक बढ़ रहा है इसलिए मैं दैत्योंके चक्रमें अर वर्ग अर्थात् अरोंके समूहकी रचना बिल्कुल बंद कर देती हूँ । [चक्रके बीचमें जो खड़ी लकड़ियां लगी रहती हैं उन्हें अर कहते हैं । इस श्लोकमें 'अधुनाम्' यह क्रिया गूढ़ है इसलिए यह भी क्रियागुप्त कह-

१ सरल ऋजु । २ अलकसहितमुखम् । प्रथमप्रश्नोत्तरपक्षे सालवनम् । ३ नेत्रोत्सवकरीम् । पक्षे नय प्रापय । न मा स्म । आनन्दिनीम् आनन्दकरीम् । ४ आहाररमनु– च० । ५ बहुविधम् । ६ भुङ्क्ष्व । ७ पतिव्रते । ८ अधुना अद्य । पक्षे अधुनात् धुनाति स्म । दरं भयं यथा भवति तथा । ९ गुहाम् । १० समुत्पतितुमिच्छुः । ११ केसरसमूहम् । १२ इदानीम् पक्षे धुनासि स्म । १३ गर्भार्भकेन । १४ –वर्गस्य च० । अमरसमूहस्य । १५ अधुना अद्य अधुनाम् धुनोमि स्म । १६ अमरसर्गस्य देवसमूहस्य । पक्षे अरसर्गस्य चक्रस्य अराणां धाराणां सर्गः सृष्टिर्यस्य तत् तस्य चक्रस्य । १७ घटनाम् ।

* यह एकालापक है । जहां दो या उससे भी अधिक प्रश्नोंका एक ही उत्तर दिया जाता है उसे एकालापक कहते हैं ।

† यह भी एकालापक है ।

[1]वटवृक्षः पुरोऽयं ते घनच्छायः[2] स्थितो महान् । इत्युक्तोऽपि न तं घर्मे[3] श्रितः कोऽपि वदाद्भुतम् ॥२२६॥
[स्पष्टान्धकम्]

[4]मुक्ताहाररुचिः सोष्मा हरिचन्दनचर्चितः । आपाण्डुरुचिराभाति विरहीव तव स्तनः ॥२२७॥
[समानोपमम्]

जगतां जनितानन्दो[5] निरस्तदुरितेन्धनः । स[6] यः कनकसच्छायो जनिता ते स्तनन्धयः ॥२२८॥
[गूढचतुर्थकम्]

जगज्जयी जितानङ्गः सतां[7] गतिरनन्तदृक् । तीर्थकृत्कृतकृत्यश्च जयतात्तनयः स ते ॥२२९॥
[[8]निरौष्ठ्यम्]

स ते कल्याणि कल्याणशतं संदर्श नन्दनः । यास्यत्यनागतिस्थानं[9] [10]धृतिं [11]धेहि ततः सति ॥२३०॥
[निरौष्ठ्यमेव]

लाता है] ॥ २२५ ॥ कुछ आदमी कड़कती हुई धूपमें खड़े हुए थे उनसे किसीने कहा कि 'यह तुम्हारे सामने घनी छायावाला बड़ा भारी बड़का वृक्ष खड़ा है' ऐसा कहनेपर भी उनमेंसे कोई भी वहां नहीं गया । हे माता, कहिये यह कैसा आश्चर्य है ? इसके उत्तरमें माताने कहा कि इस श्लोकमें जो 'वटवृक्षः' शब्द है उसकी सन्धि 'वटो + ऋक्षः' इस प्रकार तोड़ना चाहिये और उसका अर्थ ऐसा करना चाहिये कि 'रे लड़के ! तेरे सामने यह मेघके समान कांतिवाला (काला) बड़ा भारी रीछ (भालू) बैठा है' ऐसा कहनेपर कड़ी धूपमें भी उसके पास कोई मनुष्य नहीं गया तो क्या आश्चर्य है ? [यह स्पष्टांधक श्लोक है] ॥ २२६ ॥ हे माता, आपका स्तन मुक्ताहाररुचि है अर्थात् मोतियोंके हारसे शोभायमान है, उष्णतासे सहित है, सफेद चंदनसे चर्चित है और कुछ कुछ सफेद वर्ण है इसलिए किसी विरही मनुष्यके समान जान पड़ता है क्योंकि विरही मनुष्य भी मुक्ताहाररुचि होता है, अर्थात् आहारसे प्रेम छोड़ देता है, काम-ज्वर सम्बन्धी उष्णतासे सहित होता है, शरीरका संताप दूर करनेके लिये चंदनका लेप लगाये रहता है और विरहकी पीड़ासे कुछ कुछ सफेद वर्ण हो जाता है । [यह श्लेषोपमालंकार है] ॥ २२७ ॥ हे माता, तुम्हारे संसारको आनंद उत्पन्न करनेवाला, कर्मरूपी ईंधनको जलानेवाला और तपाये हुए सुवर्णके समान कांति धारण करनेवाला पुत्र उत्पन्न होगा । [यह श्लोक गूढ़चतुर्थक कहलाता है क्योंकि इस श्लोकके चतुर्थ पादमें जितने अक्षर हैं वे सबके सब पहलेके तीन पादोंमें आ चुके हैं जैसे 'जगतां जनिता नंदो निरस्तदुरितेन्धनः । संतप्तकनकच्छायो जनिता ते स्तनंधयः ॥'] ॥ २२८ ॥ हे माता, आपका वह पुत्र सदा जयवन्त रहे जो कि जगत्को जीतनेवाला है, कामको पराजित करनेवाला है, सज्जनोंका आधार है, सर्वज्ञ है, तीर्थंकर है और कृतकृत्य है [यह निरौष्ठ्य श्लोक है क्योंकि इसमें ओठसे उच्चारण होनेवाले 'उकार, पवर्ग और उपध्मानीय अक्षर नहीं हैं] ॥ २२९ ॥ हे कल्याणि, हे पतिव्रते, आपका वह पुत्र सैकड़ों कल्याण दिखाकर ऐसे स्थानको (मोक्ष) प्राप्त करेगा जहाँसे पुनरागमन नहीं होता इसलिये आप सन्तोषको प्राप्त होओ [यह

---

१ वटवृक्षः न्यग्रोधपादपः । पक्षे वटो भो माणवक, ऋक्षः भल्लूकः । 'ऋक्षाच्छभल्लभल्लूकाः' । २ भूर्धनातपः पक्षे मेघच्छायः । ३ निदाघे । ४ मौक्तिकहारकान्तिः । पक्षे त्यक्ताशनरुचिः । ५ जनिता भविष्यति । 'जनिता ते स्तनन्धयः' इति चतुर्थः पादः प्रथमादित्रिषु पादेषु गूढमास्ते । ६ सन्तप्तकनकच्छायः द०, स०, म०, ल० । ७ सतां गतिः सत्पुरुषाणामाधारः । ८ ओष्ठस्पर्शनमन्तरेण पाठ्यम् । ९ मुक्तिस्थानम् । १० सन्तोषं धर । ११ धेहि स०, म०, ल० ।

द्वीपं नन्दीश्वरं देवा मन्दरागं च सेवितुम् । [1]सुदन्तीन्द्रैः समं यान्ति सुन्दरीभिः समुत्सुकाः ॥२३१॥
[बिन्दुमान्]

लसद्बिन्दु[2]भिराभान्ति मुखैरमरवारणाः । [3]घटाघटनया व्योम्नि विचरन्तस्त्रिधा[4] स्रुतः ॥२३२॥
[बिन्दुच्युतकम्]

मकरन्दारुणं तोयं धत्ते तत्पुरखातिका । साम्बुजं क्वचिदुद्बिन्दुजलं [6][चलन्] मकरदारुणम् ॥२३३॥
[बिन्दुच्युतकमेव]

१ वैराग्यपरायणाः। २ श्रुतकीर्तिनामा कश्चिच्छ्रावकः। ३ देशव्रतिनाम्। ४ पवित्रस्वरूपा ५ प्रियव्रतसंज्ञका कापि स्त्री। ६ मोक्तुमिच्छावतामग्रेसरः। आदिनाथादीनामादौ मुक्तोऽभूदित्यर्थः। ७ अभ्युदये रागो यस्य सस्तम्, पक्षे स्वोदये रागवन्तम्। ८ स्वीकृत। ९ दिनान्ते– ल०। १० आक्रमणम्।

शार्दूलविक्रीडितम्

[1]स्वान्तर्नीतसमस्तवस्तुविसरां [2]प्रास्तीर्णवर्णोज्ज्वलाम्
निर्णिक्तां[3] नयचक्र[4]सन्निधिगुरुं स्फी[5]तप्रमोदाहृतिम् ।
विश्वास्यां[6] निखिलाङ्गभृत्परिचितां[7] जैनीमिव व्याहृतिं[8]
प्राविक्षत्परया मुदा निधिपतिः [9]स्वामुत्पताकां पुरीम् ॥१८६॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसङ्ग्रहे भगवद्धर्मोपदेशनोपवर्णनं नाम चतुर्विंशतितमं पर्व ।

करता है उसी प्रकार भरत भी अपने राज्य-शासनके उदयकालमें प्रजासे राग अर्थात् प्रेम धारण कर रहे थे, सूर्य जिस प्रकार आभिमुख्य अर्थात् प्रधानताको धारण करता है उसी प्रकार भरत भी प्रधानताको धारण कर रहे थे, सूर्य जिस प्रकार विजयी होता है उसी प्रकार भरत भी विजयी थे, और सायंकालके समय जिस प्रकार समस्त दिशाओंको प्रकाशित करनेवाली किरणें सूर्यके पीछे पीछे जाती हैं ठीक उसी प्रकार समस्त दिशाओंमें आक्रमण करनेवाले भरतके छोटे भाई उनके पीछे पीछे जा रहे थे ॥१८५॥ इस प्रकार निधियोंके अधिपति महाराज भरतने बड़े भारी आनन्दके साथ अपनी अयोध्यापुरीमें प्रवेश किया था। उस समय उसमें अनेक ध्वजाएं फहरा रही थीं और वह ठीक जिनवाणीके समान सुशोभित हो रही थी, क्योंकि जिस प्रकार जिनवाणीके भीतर समस्त पदार्थोंका विस्तार भरा रहता है उसी प्रकार उस अयोध्यामें अनेक पदार्थोंका विस्तार भरा हुआ था। जिस प्रकार जिनवाणी फैले हुए वर्णों अर्थात् अक्षरोंसे उज्ज्वल रहती है उसी प्रकार वह अयोध्या भी फैले हुए-जगह जगह बसे हुए क्षत्रिय आदि वर्णोंसे उज्ज्वल थी। जिस प्रकार जिनवाणी अत्यन्त शुचिरूप-पवित्र होती है उसी प्रकार वह अयोध्या भी शुचिरूप-कर्दम आदिसे रहित-पवित्र थी। जिस प्रकार जिनवाणी समूहके सन्निधानसे श्रेष्ठ होती है उसी प्रकार वह अयोध्या भी नीतिसमूहके सन्निधानसे श्रेष्ठ थी। जिस प्रकार जिनवाणी विस्तृत आनन्दको देनेवाली होती है उसी प्रकार वह अयोध्या भी सबको विस्तृत आनन्द की देनेवाली थी, जिस प्रकार जिनवाणी विश्वास्य अर्थात् विश्वास करने योग्य होती है अथवा सब ओर मुखवाली अर्थात् समस्त पदार्थोंका निरूपण करनेवाली होती है उसी प्रकार वह अयोध्या भी विश्वास करनेके योग्य अथवा सब ओर हैं आस्य अर्थात् मुख जिसके ऐसी थी-उसके चारों ओर गोपुर बने हुए थे, और जिस प्रकार जिनवाणी सभी अंग अर्थात् द्वादशांगको धारण करनेवाले मुनियोंके द्वारा परिचित-अभ्यस्त रहती है उसी प्रकार वह अयोध्या भी समस्त जीवोंके द्वारा परिचित थी-उसमें प्रत्येक प्रकारके प्राणी रहते थे ॥१८६॥

इस प्रकार भगवज्जिनसेनाचार्यप्रणीत त्रिषष्टिलक्षण महापुराणसंग्रहके हिन्दी भाषानुवादमें भगवत्कृत धर्मोपदेशका वर्णन करनेवाला चौबीसवां पर्व समाप्त हुआ।

---

१ निजाभ्यन्तरमानीतसमस्तद्रव्यसमूहम्, पक्षे निजाभ्यन्तरमानीतसमस्तपदार्थस्वरूपसमूहम् । २ विस्तीर्ण क्षत्रियादिवर्ण, पक्षे विस्तीर्णाक्षर । ३ पोषकाम्, पक्षे शुद्धाम् । णिजिरिङ् शौचपोषयोरिति धातोः सम्भवात् । ४ नयेन नीत्या उपलक्षितचक्ररत्नसम्बन्धेन गुरुम्, पक्षे नयसमूहसम्बन्धेन गुरुम् । ५ बहुलसन्तोषस्याहरणं यस्याः सकाशात् जनानाम् । उभयत्र सदृशम् । ६ विश्वतोमुखीम् । परितो गोपुरवतीमित्यर्थः । पक्षे विश्वासयोग्याम् । ७ सकलप्राणिगणैः परिचिताम् । सप्ताङ्गवद्भिः परिचिताम् वा । पक्षे द्वादशाङ्गधारिभिः परिचिताम् । ८ भारतीम् । ९ आत्मीयाम् ।

पञ्चविंशतितमं पर्व

गते भरतराजर्षौ[1] दिव्यभाषोपसंहृतौ[1]। निवातस्तिमितं[2] वार्धिमिवानाविष्कृतध्वनिम् ॥१॥
धर्माम्बुवर्षसंसिक्तजगज्जनवनद्रुमम्। प्रावृड्घनमिवोद्वान्त[3]वृष्टिमुत्सृष्टनिःस्वनम् ॥२॥
कल्पद्रुममिवाभीष्टफलविश्राण[4]नोद्यतम्। स्वपादाभ्यर्णविश्रान्तत्रिजगज्जनमूर्जितम् ॥३॥
विवस्वन्तमिवोद्भूतमोहान्धतमसोदयम्। नवकेवललब्धीद्धकरोत्करविराजितम् ॥४॥
महाकरमिवोद्भूतगुणरत्नोच्च[5]याचितम्। भगवन्तं जगत्कान्तमचिन्त्यानन्तवैभवम् ॥५॥
वृतं श्रमणसङ्घेन चतुर्धा[6] भेदमीयुषा। चतुर्विध[7]वनाभोगपरिष्कृतमिवाद्रिपम् ॥६॥
प्रातिहार्याष्टकोपेत[8]म् इद्धकल्याणपञ्चकम्। चतुस्त्रिंशदतीशेषैः[9] इद्धर्द्धिं त्रिजगत्प्रभुम् ॥७॥
प्रपश्यन् विकसन्नेत्रसहस्रः प्रीतमानसः। सौधर्मेन्द्रः स्तुतिं कर्तुम् अथारेभे समाहितः ॥८॥
तोष्ये त्वां परमं ज्योतिर्गुणरत्नमहाकरम्। मतिप्रकर्षहीनोऽपि केवलं भक्तिचोदितः ॥९॥
त्वामभिष्टुवतां भक्त्या विशिष्टाः फलसम्पदः। स्वयमाविर्भवन्तीति निश्चित्य त्वां जिनस्तुवे ॥१०॥
स्तुतिः पुण्यगुणोत्कीर्तिः स्तोता भव्यः[10] प्रसन्नधीः। निष्ठितार्थो भवान् स्तुत्यः फलं नैःश्रेयसं सुखम् ११

अथानन्तर–राजर्षि भरतके चलेजाने और दिव्य ध्वनिके बन्द हो जानेपर वायु बन्द होनेसे निश्चल हुए समुद्रके समान जिनका शब्द बिलकुल बंद हो गया है। जिन्होंने धर्म-रूपी जलकी वर्षाके द्वारा जगत्के जीवरूपी वनके वृक्ष सींच दिये हैं अतएव जो वर्षा कर चुकनेके बाद शब्दरहित हुए वर्षाऋतुके बादलके समान जान पड़ते हैं, जो कल्पवृक्षके समान अभीष्ट फल देनेमें तत्पर रहते हैं, जिनके चरणोंके समीपमें तीनों लोकोंके जीव विश्राम लेते हैं, जो अनन्त बलसे सहित हैं। जिन्होंने सूर्यके समान मोहरूपी गाढ़ अन्धकारके उदयको नष्ट कर दिया है, और जो नव केवललब्धिरूपी देदीप्यमान किरणोंके समूहसे सुशोभित हैं। जो किसी बड़ी भारी खानके समान उत्पन्न हुए गुणरूपी रत्नोंके समूहसे व्याप्त हैं, भगवान् हैं, जगत्के अधिपति हैं, और अचिन्त्य तथा अनन्त वैभवको धारण करनेवाले हैं। जो चार प्रकारके श्रमण संघसे घिरे हुए हैं और उनसे ऐसे जान पड़ते हैं मानो भद्रशाल आदि चारों वनोंके विस्तारसे घिरा हुआ सुमेरुपर्वत ही हो। जो आठ प्रातिहार्योंसे सहित हैं, जिनके पांच कल्याणक सिद्ध हुए हैं, चौंतीस अतिशयोंके द्वारा जिनका ऐश्वर्य बढ़ रहा है और जो तीनों लोकोंके स्वामी हैं, ऐसे भगवान् वृषभदेवको देखते ही जिसके हजार नेत्र विकसित हो रहे हैं और मन प्रसन्न हो रहा है ऐसे सौधर्म स्वर्गके इन्द्रने स्थिरचित्त होकर भगवान्की स्तुति करना प्रारम्भ की ॥१–८॥ हे प्रभो, यद्यपि मैं बुद्धिकी प्रकर्षतासे रहित हूँ तथापि केवल आपकी भक्तिसे ही प्रेरित होकर परम ज्योतिस्वरूप तथा गुणरूपी रत्नोंकी खानस्वरूप आपकी स्तुति करता हूं ॥९॥ हे जिनेन्द्र, भक्तिपूर्वक आपकी स्तुति करनेवाले पुरुषोंमें उत्तम उत्तम फलरूपी संपदाएं अपने आप ही प्राप्त होती हैं यही निश्चयकर आपकी स्तुति करता हूं ॥१०॥ पवित्र गुणोंका निरूपण करना स्तुति है, प्रसन्न बुद्धिवाला भव्य स्तोता अर्थात् स्तुति करनेवाला है, जिनके सब पुरुषार्थ सिद्ध हो चुके हैं ऐसे आप स्तुत्य अर्थात् स्तुतिके विषय हैं, और मोक्षका सुख

---

१ –संहृतेः द०। २ निश्चलम्। ३ उद्वमित। ४ दान। ५ राशि। ६ मुनिऋषियत्यनगारा इति चतुर्विधभेदम्। ७ भद्रशालादि। ८ –पेतं सिद्ध– ल०, इ०। ९ अतिशयैः। १० भव्योऽहम्।

इत्याकलय्य मनसा [1]तुष्टूषुं मां फलार्थिनम् । विभो प्रसन्नया दृष्ट्या त्वं पुनीहि[2] सनातन ॥१२॥
मामुदाकुरुते[3] भक्तिस्त्वद्गुणैः परिचोदिता । ततः स्तुतिपथे तेऽस्मिन् लग्नः[4] संविग्नमानसः[5] ॥१३॥
त्वयि भक्तिः कृताल्पापि महतीं फलसम्पदम् । [6]पम्फलीति विभो कल्पक्ष्माजसेवेव देहिनाम् ॥१४॥
तवारिजयमाचष्टे वपुरस्पृष्टकैतवम् । दोषावेशविकारा हि रागिणां भूषणादयः ॥१५॥
निर्भूषमपि कान्तं ते वपुर्भुवनभूषणम् । [7]दीप्रं हि भूषणं नैव भूषणान्तरमीक्षते ॥१६॥
न मूर्ध्नि कबरीबन्धो न शेखरपरिग्रहः । न किरीटादिभारस्ते तथापि रुचिरं शिरः ॥१७॥
न मुखे भ्रुकुटीन्यासो न दष्टो दशनच्छदः । नास्त्रे व्यापारितो हस्तस्तथापि त्वमरीनहन्[8] ॥१८॥
त्वया नाताम्रिते नेत्रे नीलोत्पलदलायते[9] । मोहारिविजये देव प्रभुशक्तिस्तवाद्भुता ॥१९॥
[10]अपापाङ्गावलोकं ते जिनेन्द्र नयनद्वयम् । मदनारिजयं वक्ति व्यक्तं नः सौम्यवीक्षितम् ॥२०॥
त्वद्दृशोरमला दीप्तिः आस्पृशन्ती शिरस्सु नः । पुनाति पुण्य[11]धारेव जगतामेकपावनी ॥२१॥

प्राप्त होना उसका फल है । हे विभो, हे सनातन, इस प्रकार निश्चयकर हृदयमें स्तुति करने वाले और फलकी इच्छा करनेवाले मुझको आप अपनी प्रसन्न दृष्टिसे पवित्र कीजिये ॥११–१२॥ हे भगवन्, आपके गुणोंके द्वारा प्रेरित हुई भक्ति ही मुझे आनन्दित कर रही है इसलिये मैं संसारसे उदासीन होकर भी आपकी इस स्तुतिके मार्गमें लग रहा हूँ–प्रवृत्त हो रहा हूँ ॥१३॥ हे विभो, आपके विषयमें की गई थोड़ी भी भक्ति कल्पवृक्षकी सेवाकी तरह प्राणियोंके लिये बड़ी बड़ी संपदाएंरूपी फल फलती है–प्रदान करती है ॥१४॥ हे भगवन्, आभूषण आदि उपाधियोंसे रहित आपका शरीर आपके रागद्वेष आदि शत्रुओं-की विजयको स्पष्ट रूपसे कह रहा है क्योंकि आभूषण वगैरह रागी मनुष्योंके दोष प्रकट करनेवाले विकार हैं । भावार्थ–रागी द्वेषी मनुष्य ही आभूषण पहिनते हैं परन्तु आपने रागद्वेष आदि अन्तरंग शत्रुओंपर पूर्ण विजय प्राप्त कर ली है इसलिये आपको आभूषण आदिके पहिननेकी आवश्यकता नहीं है ॥१५॥ हे प्रभो, जगत्को सुशोभित करनेवाला आपका यह शरीर भूषणरहित होनेपर भी अत्यन्त सुन्दर है सो ठीक ही है क्योंकि जो आभूषण स्वयं देदीप्यमान होता है वह दूसरे आभूषणकी प्रतीक्षा नहीं करता ॥१६॥ हे भगवन्, यद्यपि आपके मस्तकपर न तो सुन्दर केशपाश है, न शेखरका परिग्रह है और न मुकुटका भार ही है तथापि वह अत्यन्त सुन्दर है ॥१७॥ हे नाथ, आपके मुखपर न तो भौंह ही टेढ़ी हुई है, न आपने ओठ ही डसा है और न आपने अपना हाथ ही शस्त्रोंपर व्यापृत किया है–हाथसे शस्त्र उठाया है फिर भी आपने घातियाकर्मरूपी शत्रुओंको नष्ट कर दिया है ॥१८॥ हे देव, आपने मोहरूपी शत्रुके जीतनेमें अपने नील कमलके दलके समान बड़े बड़े नेत्रोंको कुछ भी लाल नहीं किया था, इससे मालूम होता है कि आपकी प्रभुत्वशक्ति बड़ा आश्चर्य करनेवाली है ॥१९॥ हे जिनेन्द्र, आपके दोनों नेत्र कटाक्षावलोकनसे रहित हैं और सौम्य दृष्टिसे सहित हैं इसलिये वे हम लोगोंको स्पष्ट रीतिसे बतला रहे हैं कि आपने कामदेवरूपी शत्रुको जीत लिया है ॥२०॥ हे नाथ, हम लोगोंके मस्तकका स्पर्श करती हुई और जगत्को एकमात्र पवित्र करती हुई आपके नेत्रों-

---

१ स्तोतुमिच्छुम् । २ पवित्रीकुरु । ३ प्रोत्साहयति । ४ प्रवृत्तोऽस्मि । ५ धर्माधर्मफलानुरागमानसः । ६ भृशं फलति । ७ दीप्तं- ल०, अ०, प० । ८ हंसि स्म । ९ दलायिते- द० । १० कटाक्षवीक्षणम् । अनपाङ्गाव– ल० । ११ शान्तिधारा ।

तवेदमाननं धत्ते प्रफुल्लकमलश्रियम् । स्वकान्तिज्योत्स्नया विश्वम् आक्रामच्छरदिन्दुवत् ॥२२॥
अनट्टहासहुङ्कारम् अदष्टोष्ठपुटं मुखम् । जिनाख्याति सुमेधोभ्यस्तावकीं वीतरागताम् ॥२३॥
त्वन्मुखादुद्यती दीप्तिः पावनीव सरस्वती । विधुन्वती तमो भाति जितबालातपद्युतिः ॥२४॥
त्वन्मुखाम्बुरुहालग्ना सुराणां नयनावलिः । भातीयमलिमालेव [1]तदामोदानुपातिनी ॥२५॥
मकरन्दमिवापीय[2] त्वद्वक्त्राब्जोद्गतं वचः । अनाशितंभवं[3] भव्यभ्रमरा यान्त्यमी मुदम् ॥२६॥
एकतोऽभिमुखोपि त्वं लक्ष्यसे विश्वतोमुखः । तेजोगुणस्य माहात्म्यम् इदं नूनं तवाद्भुतम् ॥२७॥
[4]विश्वदिक्षु विसर्पन्ति तावका वागभीषवः[5] । तिरश्चामपि हृद्ध्वान्तम् उद्धुन्वन्तो जिनांशुमान् ॥२८॥
तव वागमृतं पीत्वा वयमद्यामराः[6] स्फुटम् । पीयूषमिदमिष्टं नो देव सर्वरुजाहरम् ॥२९॥
जिनेन्द्र तव [7]वक्त्राब्जं प्रक्षरद्वचनामृतम् । भव्यानां प्रीणनं[8] भाति धर्मस्येव [9]निधानकम् ॥३०॥
मुखेन्दुमण्डलाद्देव तव वाक्किरणा इमे । विनिर्यान्तो हतध्वान्ताः सभामाह्लादयन्त्यलम् ॥३१॥
चित्रं वाचां विचित्राणाम् अक्रमः प्रभवः प्रभो[10] । अथवा तीर्थकृत्त्वस्यन्देव वैभवमीदृशम् ॥३२॥

की निर्मल दीप्ति पुण्यधाराके समान हम लोगोंको पवित्र कर रही है ॥२१॥ हे भगवन्, शरद् ऋतुके चन्द्रमाके समान अपनी कान्तिरूपी चाँदनीसे समस्त जगत्को व्याप्त करता हुआ आपका यह मुख फूले हुए कमलकी शोभा धारण कर रहा है ॥२२॥ हे जिन, आपका मुख न तो अट्टहाससे सहित है, न हुंकारसे युक्त है और न ओठोंको ही दबाये हैं इसलिये वह बुद्धिमान् लोगोंको आपकी वीतरागता प्रकट कर रहा है ॥२३॥ हे देव, जो अन्धकारको नष्ट कर रही है और जिसने प्रातःकालके सूर्यकी प्रभाको जीत लिया है ऐसी आपकी मुखसे निकलती हुई पवित्र कान्ति सरस्वतीके समान सुशोभित हो रही है ॥२४॥ हे भगवन्, आपके मुखरूपी कमलपर लगी हुई यह देवोंके नेत्रोंकी पंक्ति ऐसी जान पड़ती है मानो उसकी सुगन्धिके कारण चारों ओरसे झपटती हुई भ्रमरोंकी पंक्ति ही हो ॥२५॥ हे नाथ, जिनसे कभी तृप्ति न हो ऐसे आपके मुखरूपी कमलसे निकले हुए आपके वचनरूपी मकरन्दका पान कर ये भव्य जीवरूपी भ्रमर आनन्दको प्राप्त हो रहे हैं ॥२६॥ हे भगवन्, यद्यपि आप एक ओर मुख किये हुए विराजमान हैं तथापि ऐसे दिखाई देते हैं जैसे आपके मुख चारों ओर हों। हे देव, निश्चय ही यह आपके तपश्चरणरूपी गुणका आश्चर्य करनेवाला माहात्म्य है ॥२७॥ हे जिनेन्द्ररूपी सूर्य, तिर्यंचोंके भी हृदयगत अन्धकारको नष्ट करनेवाली आपकी वचनरूपी किरणें सब दिशाओंमें फैल रही हैं ॥२८॥ हे देव, आपके वचनरूपी अमृतको पीकर आज हम लोग वास्तवमें अमर हो गये हैं इसलिये सब रोगोंको हरनेवाला आपका यह वचनरूप अमृत हम लोगोंको बहुत ही इष्ट है—प्रिय है ॥२९॥ हे जिनेन्द्र देव, जिससे वचनरूपी अमृत झर रहा है और जो भव्य जीवोंका जीवन है ऐसा यह आपका मुखरूपी कमल धर्मके खजानेके समान सुशोभित हो रहा है ॥३०॥ हे देव, आपके मुखरूपी चन्द्रमण्डलसे निकलती हुई ये वचनरूपी किरणें अन्धकारको नष्ट करती हुई सभाको अत्यन्त आनन्दित कर रही हैं ॥३१॥ हे देव, यह भी एक आश्चर्यकी बात है कि आपसे अनेक प्रकारकी भाषाओंकी एक साथ उत्पत्ति होती है अथवा आपके तीर्थंकर-

---

१ मुखाम्बुजसहानुमोदमनुव्रजन्ती । २ पीत्वा । ३ अतृप्तिकरम् । तपोगुणस्य- ल० । ४ सकलदिक्षु । ५ वचनकिरणाः । ६ न म्रियन्त इत्यमराः । ७ तव वाग्रूपममृतम् । ८ प्राणनं- ल० । ९ निक्षेपः । १० प्रभोः- ल० ।

[1]अस्वेदमलमाभाति सुगन्धि शुभलक्षणम् । सुसंस्थानमरक्ता[2]सृग्वपुर्वज्रस्थिरं तव ॥३३॥
सौरूप्यं नयनाह्लादि सौभाग्यं चित्तरञ्जनम् । सुवाक्त्वं जगदानन्दि तवासाधारणा गुणाः ॥३४॥
अमेयमपि ते वीर्यं मितं देहे प्रभान्विते । स्वल्पेऽपि दर्पणे बिम्बं माति[3] स्तम्बेरमं[4] ननु ॥३५॥
त्वदास्थानस्थितोद्देशं[5] परितः शतयोजनम् । सुलभाशनपानादि त्वन्महिम्नोपजायते ॥३६॥
गगनानुगतं यानं[6] तवासीद् भुवमस्पृशत् । [7]देवासुरं भरं सोढुम् अक्षमा धरणीति नु ॥३७॥
क्रूरैरपि मृगैर्हिंस्रैः हन्यन्ते जातु नाङ्गिनः । सद्धर्मदेशनोद्युक्ते त्वयि सञ्जीवनौषधे ॥३८॥
न भुक्तिः क्षीणमोहस्य [8]तवानन्तसुखोदयात् । क्षुत्क्लेशबाधितो जन्तुः कवलाहारभुग्भवेत् ॥३९॥
[9]असद्वेद्योदयाद् भुक्तिं त्वयि यो योजयेदधीः । [10]मोहानिलप्रतीकारे तस्यान्वेष्यं[11] जरद्घृतम्[12] ॥४०॥
असद्वेद्यविषं घाति विध्वंसध्वस्तशक्तिकम् । त्वय्यकिञ्चित्करं मन्त्रशक्त्येवापबलं[13] विषम् ॥४१॥

पनेका माहात्म्य ही ऐसा है ॥३२॥ हे भगवन्, जो पसीना और मलमूत्रसे रहित है, सुगन्धित है, शुभ लक्षणोंसे सहित है, समचतुरस्र संस्थान है, जिसमें लाल रक्त नहीं है और जो वज्रके समान स्थिर है ऐसा यह आपका शरीर अतिशय सुशोभित हो रहा है ॥३३॥ हे देव, नेत्रोंको आनन्दित करनेवाली सुन्दरता, मनको प्रसन्न करनेवाला सौभाग्य और जगत्को हर्षित करनेवाली मीठी वाणी ये आपके असाधारण गुण हैं अर्थात् आपको छोड़-कर संसारके अन्य किसी प्राणीमें नहीं रहते हैं ॥३४॥ हे भगवन्, यद्यपि आपका वीर्य अपरिमित है तथापि वह आपके परिमित अल्प परिमाणवाले शरीरमें समाया हुआ है सो ठीक ही है क्योंकि हाथीका प्रतिबिम्ब छोटेसे दर्पणमें भी समा जाता है ॥३५॥

हे नाथ, जहाँ आपका समवसरण होता है उसके चारों ओर सौ सौ योजन तक आपके माहात्म्यसे अन्न पान आदि सब सुलभ हो जाते हैं ॥३६॥ हे देव, यह पृथिवी समस्त सुर और असुरोंका भार धारण करनेमें असमर्थ है इसलिये ही क्या आपका समवसरणरूपी विमान पृथिवीका स्पर्श नहीं करता हुआ सदा आकाशमें ही विद्यमान रहता है ॥३७॥ हे भगवन्, संजीवनी औषधिके समान आपके समीचीन धर्मका उपदेश देनेमें तत्पर रहते हुए सिंह व्याघ्र आदि क्रूर हिंसक जीव भी दूसरे प्राणियोंकी कभी हिंसा नहीं करते हैं ॥३८॥ हे प्रभो, आपके मोहनीय कर्मका क्षय हो जानेसे अत्यन्त सुखकी उत्पत्ति हुई है इसलिये आपके कवलाहार नहीं है सो ठीक ही है, क्योंकि क्षुधाके क्लेशसे दुखी हुए जीव ही कवलाहार भोजन करते हैं ॥३९॥ हे जिनेन्द्र, जो मूर्ख असातावेदनीय कर्मका उदय होनेसे आपके भी कवलाहारकी योजना करते हैं अर्थात् यह कहते हैं कि आप भी कवलाहार करते हैं क्योंकि आपके असातावेदनीय कर्मका उदय है उन्हें मोहरूपी वायुरोगको दूर करनेके लिये पुराने घीकी खोज करनी चाहिये। अर्थात् पुराने घीके लगानेसे जैसे सन्निपात–वातज्वर शान्त हो जाता है उसी तरह अपने मोहको दूर करनेके लिये किसी पुराने अनुभवी पुरुषका स्नेह प्राप्त करना होगा ॥४०॥ हे देव, मन्त्रकी शक्तिसे जिसका बल नष्ट हो गया है ऐसा विष जिस प्रकार कुछ भी नहीं कर सकता है उसी प्रकार घातियाकर्मोंके नष्ट हो जानेसे जिसकी शक्ति नष्ट हो गई है ऐसा असाता

---

१ स्वेदमलरहितम् । २ गौररुधिरम् । ३ प्रमाति । ४ स्तम्भेरमसम्बन्धि । ५ तव समवसरणस्थितप्रदेशस्य समन्तात् । ६ गमनम् । ७ देवासुरभरं– ल० । ८ तवात्यन्त– इ०, ल० । ९ असातवेदनीयोदयात् । १० अज्ञानवातरोगप्रतीकारे । ११ मृग्यम् । १२ चिरन्तनाज्यम् । १३ अपगतबलम् ।

असद्वेद्योदयो घातिसहकारिव्यपायतः । त्वय्यकिञ्चित्करो नाथ सामग्र्या हि फलोदयः ॥४२॥
नेतयो नोपसर्गाश्च प्रभवन्ति त्वयीशिनि[1] । जगतां पालके[2] हेलाक्षालितांहः कलङ्कके ॥४३॥
त्वय्यनन्तमुखो[3]त्सर्पत्केवलामललोचने । चातुरास्यमिदं[4] युक्तं [5]नष्टघातिचतुष्टये ॥४४॥
सर्वविद्येश्वरो योगी चतुरास्यस्त्वमक्षरः । सर्वतोऽक्षिमयं[6] ज्योतिस्तन्वानो[7] भास्यधीशितः[8] ॥४५॥
अच्छायत्वमनुन्मेषनिमेषत्वञ्च ते वपुः । धत्ते तेजोमयं दिव्यं परमौदारिकाह्वयम् ॥४६॥
बिभ्राणोऽप्यध्यधिच्छत्रम्[9] अच्छाया[10]ङ्गस्त्वमीक्ष्यसे । महतां चेष्टितं चित्रम् अथवौजस्तवेदृशम् ॥४७॥
निमेषापायधीराक्षं तव वक्त्राब्जमीक्षितुम् । [11]त्वय्येव नयनस्पन्दो नूनं देवैश्च संहृतः ॥४८॥
नखकेशमितावस्था तवाविष्कुरुते विभो । रसादिविलयं देहे विशुद्धस्फटिकामले ॥४९॥
इत्युदारैर्गुणैरेभिस्त्वमनन्यत्रभाविभिः । स्वयमेत्य वृतो नूनम् अदृष्टशरणान्तरैः ॥५०॥

वेदनीयरूपी विष आपके विषयमें कुछ भी नहीं कर सकता ॥४१॥ हे नाथ, घातिया कर्मरूपी सहकारी कारणोंका अभाव हो जानेसे असातावेदनीयका उदय आपके विषयमें अकिंचित्कर है अर्थात् आपका कुछ नहीं कर सकता, सो ठीक ही है क्योंकि फलका उदय सब सामग्री इकट्ठी होने पर ही होता है ॥४२॥ हे ईश, आप जगत्के पालक हैं और अपने लीलामात्रसे ही पापरूपी कलंक धो डाले हैं, इसलिये आप पर न तो ईतियां अपना प्रभुत्व जमा सकती हैं और न उपसर्ग ही । भावार्थ—आप ईति, भीति तथा उपसर्गसे रहित हैं ॥४३॥ हे भगवन्, यद्यपि आपका केवल ज्ञानरूपी निर्मल नेत्र अनन्तमुख हो अर्थात् अनन्तज्ञेयोंको जानता हुआ फैल रहा है फिर भी चूंकि आपके चार घातियाकर्म नष्ट हो गये हैं इसलिये आपके यह चातुरास्य अर्थात् चार मुखोंका होना उचित ही है ॥४४॥ हे अधीश्वर, आप सब विद्याओंके स्वामी हैं, योगी हैं, चतुर्मुख हैं, अविनाशी हैं और आपकी आत्ममय केवलज्ञानरूपी ज्योति चारों ओर फैल रही है इसलिये आप अत्यन्त सुशोभित हो रहे हैं ॥४५॥ हे भगवन्, तेजोमय और दिव्यस्वरूप आपका यह परमौदारिक शरीर छायाका अभाव तथा नेत्रोंकी अनुन्मेष वृत्तिको धारण कर रहा है अर्थात् आपके शरीरकी न तो छाया ही पड़ती है और न नेत्रोंके पलक ही झपते हैं ॥४६॥ हे नाथ, यद्यपि आप तीन छत्र धारण किये हुए हैं तथापि आप छायारहित ही दिखाई देते हैं, सो ठीक ही है क्योंकि महापुरुषोंकी चेष्टाएँ आश्चर्य करनेवाली होती हैं अथवा आपका प्रताप ही ऐसा है ॥४७॥ हे स्वामिन्, पलक न झपनेसे जिसके नेत्र अत्यन्त निश्चल हैं ऐसे आपके मुख-रूपी कमलको देखनेके लिये ही देवोंने अपने नेत्रोंका संचलन आपमें ही रोक रखा है । भावार्थ—देवोंके नेत्रोंमें पलक नहीं झपते सो ऐसा जान पड़ता है मानो देवोंने आपके सुन्दर मुखकमलको देखनेके लिये ही अपने पलकोंका झपाना बन्द कर दिया हो ॥४८॥ हे भगवन्, आपके नख और केशोंकी जो परिमित अवस्था है वह आपके विशुद्ध स्फटिकके समान निर्मल शरीरमें रस आदिके अभावको प्रकट करती है । भावार्थ—आपके नख और केश ज्योंके त्यों रहते हैं—उनमें वृद्धि नहीं होती है, इससे मालूम होता है कि आपके शरीरमें रस, रक्त आदिका अभाव है ॥४९॥ इस प्रकार ऊपर कहे हुए तथा जो दूसरी जगह न पाये जावें ऐसे आपके इन उदार गुणोंने दूसरी जगह घर न देखकर स्वयं आपके

---

१ त्वयीशितः ल० । २ पालके सति । ३ सुखोत्सर्पत्– द०, इ०, ल०, प०, स० । ४ चतुरास्यत्वम् । ५ नष्टे घाति– ल०, इ०, द० । ६ आत्ममयम् । ७ तवातोभास्य– ल० । ८ भो अधीश्वर । ९ छत्रस्योपर्युपरिच्छत्रम् । असामीप्येऽप्योध्युपरीति द्विर्भावः । १० छायारहित-शरीरो भूत्वा । ११ त्वय्येव– ल०, इ० ।

अप्यमी रूपसौन्दर्यकान्तिदीप्त्यादयो[1] गुणाः । स्पृहणीयाः सुरेन्द्राणां तव हेयाः किलाद्भुतम् ॥५१॥
[2]गुणिनं त्वामुपासीना निर्धूतगुण[3]बन्धनाः । त्वया सारूप्य[4]मायान्ति स्वामिच्छन्दं[5] नु शिक्षितुः[6] ॥५२॥
अयं मन्दानिलोद्धूतचलच्छाखाकरोत्करः । श्रीमानशोकवृक्षस्ते नृत्यतीवात्तसम्मदः ॥५३॥
चलत्क्षीरोदवीचीभिः स्पर्धां कर्तुमिवाभितः । चामरौघाः पतन्ति त्वां [7]मरुद्भिर्लीलया धुताः[8] ॥५४॥
मुक्तालम्बनविभ्राजि भ्राजते विधुनिर्मलम् । छत्रत्रयं तवोन्मदत्प्ररोहमिव खाङ्गणे ॥५५॥
सिंहैरूढं विभातीदं तव विष्टरमुच्चकैः । रत्नांशुभिर्भवत्स्पर्शान्मुक्तहर्षाङ्कुरैरिव ॥५६॥
ध्वनन्ति मधुरध्वानाः सुरदुन्दुभिकोटयः । घोषयन्त्य इवापूर्य रोदसी[9] त्वज्जयोत्सवम् ॥५७॥
तव दिव्यध्वनिं धीरम् अनुकर्तुमिवोद्यताः । ध्वनन्ति सुरतूर्याणां कोटयोऽर्धत्रयोदश[10] ॥५८॥
सुरैरियं नभोरङ्गात् पौष्पी वृष्टिर्वितन्यते । तुष्टया स्वर्गलक्ष्म्येव चोदितैः कल्पशाखिभिः ॥५९॥
तव देहप्रभोत्सर्पः समाक्रामन्नभोऽभितः । शश्वत्प्रभातमास्थानी जनानां जनयत्यलम्[11] ॥६०॥

पास आकर आपको स्वीकार किया है ॥५०॥ हे देव, यह भी एक आश्चर्यकी बात है कि जिनकी प्राप्तिके लिये इन्द्र भी इच्छा किया करते हैं ऐसे ये रूप-सौन्दर्य, कान्ति और दीप्ति आदि गुण आपके लिये हेय हैं अर्थात् आप इन्हें छोड़ना चाहते हैं ॥५१॥ हे प्रभो, अन्य सब गुणरूपी बंधनोंको छोड़कर केवल आपकी उपासना करनेवाले गुणी पुरुष आपकी ही सदृशता प्राप्त हो जाते हैं सो ठीक ही है क्योंकि स्वामीके अनुसार चलना ही शिष्योंका कर्त्तव्य है ॥५२॥ हे स्वामिन्, आपका यह शोभायमान अशोक वृक्ष ऐसा जान पड़ता है मानो मन्द मन्द वायुसे हिलती हुई शाखारूपी हाथोंके समूहोंसे हर्षित होकर नृत्य ही कर रहा हो ॥५३॥ हे नाथ, देवोंके द्वारा लीलापूर्वक धारण किये हुए चमरोंके समूह आपके दोनों ओर इस प्रकार ढोरे जा रहे हैं मानो वे क्षीर-सागरकी चंचल लहरोंके साथ स्पर्धा ही करना चाहते हों ॥५४॥ हे भगवन्, चन्द्रमाके समान निर्मल और मोतियोंकी जालीसे सुशोभित आपके तीन छत्र आकाशरूपी आंगनमें ऐसे अच्छे जान पड़ते हैं मानो उनमें अँकूरे ही उत्पन्न हुए हों ॥५५॥ हे देव, सिंहोंके द्वारा धारण किया हुआ आपका यह ऊंचा सिंहासन रत्नोंकी किरणोंसे ऐसा सुशोभित हो रहा है मानो आपके स्पर्शसे उसमें हर्षके रोमांच ही उठ रहे हों ॥५६॥ हे स्वामिन्, मधुर शब्द करते हुए जो देवोंके करोड़ों दुन्दुभि बाजे बज रहे हैं वे ऐसे जान पड़ते हैं मानो आकाश और पातालको व्याप्त कर आपके जयोत्सवकी घोषणा ही कर रहे हों ॥५७॥ हे प्रभो, जो देवोंके साढ़े बारह करोड़ दुन्दुभि आदि बाजे बज रहे हैं वे आपकी गम्भीर दिव्यध्वनिका अनुकरण करनेके लिये ही मानो तत्पर हुए हैं ॥५८॥ आकाशरूपी रंग-भूमिसे जो देव लोग यह पुष्पोंकी वर्षा कर रहे हैं वह ऐसी जान पड़ती है मानो संतुष्ट हुई स्वर्गलक्ष्मीके द्वारा प्रेरित हुए कल्पवृक्ष ही वह पुष्पवर्षा कर रहे हों ॥५९॥ हे भगवन्, आकाशमें चारों ओर फैलता हुआ यह आपके शरीरका प्रभामण्डल समव-सरणमें बैठे हुए मनुष्योंको सदा प्रभातकाल उत्पन्न करता रहता है अर्थात् प्रातःकालकी

---

१ दीप्तिः तेजः । २ गणिनस्त्वा– द०, इ० । गुणिनस्त्वा– ल० । ३ निर्धूतं गुणबन्धनं रज्जुरहितबन्धनं यैस्ते । निरस्तकर्मबन्धना इत्यर्थः । ४ समानरूपताम् । ५ भर्तुः प्रतिनिधि । ६ शिष्यस्य । शिक्ष विद्योपादाने । ७ देवैः । ८ धृताः- ल० । विजिताः । ९ द्यावापृथिव्यौ । १० त्रयोदशमर्धं येषां ते । सार्द्धद्वादशकोटय इत्यर्थः । ११ जनयत्ययम्- द०, इ० । जनयत्यदः- ल० ।

नखांशवस्तवाताम्राः प्रसरन्तिर्दिशास्वमी । त्वदङ्घ्रिकल्पवृक्षाग्रात् प्रारोहा इव निःसृताः ॥६१॥
शिरस्सु नः स्पृशन्त्येते प्रसादस्येव तेंऽशकाः । त्वत्पादनखशीतांशुकराः प्राह्लादिताखिलाः ॥६२॥
त्वत्पादाम्बुरुहच्छायासरसीमवगाहते । दिव्यश्री कलहंसीयं नखरोचिर्मृणालिकाम् ॥६३॥
मोहारिमर्दनालग्नशोणितार्द्रच्छटामिव । तलच्छायामिदं धत्ते त्वत्पदाम्बुरुहद्वयम् ॥६४॥
त्वत्पादनखभाभार[1]सरसि प्रतिबिम्बिताः । सुराङ्गनाननच्छायास्तन्वते पङ्कजश्रियम् ॥६५॥
स्वयंभुवे नमस्तुभ्यम् उत्पा[2]द्यात्मानमात्मनि । स्वात्मनैव तथोद्भूतवृत्तयेऽचिन्त्यवृत्तये ॥६६॥
नमस्ते जगतां पत्ये लक्ष्मीभर्त्रे नमोऽस्तु ते । विदांवर नमस्तुभ्यं नमस्ते वदतां वर ॥६७॥
कर्मशत्रु[3]हणं देवम् आमनन्ति मनीषिणः । त्वामानम[4]त्सुरेण्मौलिभामालाभ्यर्चितक्रमम् ॥६८॥
ध्यानद्रुघण[5]निर्भिन्नघनघातिमहातरुः । अनन्तभवसन्तानजयादासीदनन्तजित् ॥६९॥
त्रैलोक्यनिर्जयावाप्तदु[6]र्दर्पमतिदुर्जयम् । मृत्युराजं विजित्यासीज्जिनमृत्युञ्जयो भवान् ॥७०॥
विधुताशेषसंसारबन्धनो भव्यबान्धवः । त्रिपुरारिस्त्वमीशासि[7] जन्ममृत्युजरान्तकृत् ॥७१॥

शोभा दिखलाता रहता है ॥६०॥ हे देव, आपके नखोंकी ये कुछ कुछ लाल किरणें दिशाओंमें इस प्रकार फैल रही हैं मानो आपके चरणरूपी कल्पवृक्षोंके अग्रभाग से अँकूरे ही निकल रहे हों ॥६१॥ सब जीवोंको आह्लादित करनेवाली आपके चरणोंके नखरूपी चन्द्रमाकी ये किरणें हम लोगोंके शिरका इस प्रकार स्पर्श कर रही हैं मानो आपके प्रसादके अंश ही हों ॥६२॥ हे भगवन्, यह दिव्य लक्ष्मीरूपी मनोहर हंसी नखोंकी कान्तिरूपी मृणालसे सुशोभित आपके चरणकमलोंकी छायारूपी सरोवरीमें अवगाहन करती है ॥६३॥ हे विभो, आपके ये दोनों चरणकमलोंकी जिस कान्तिको धारण कर रहे हैं वह ऐसी जान पड़ती है मानो मोहरूपी शत्रुको नष्ट करते समय लगी हुई उसके गीले रक्तकी छटा ही हो ॥६४॥ हे देव, आपके चरणोंके नखकी कान्तिरूप जलके सरोवरमें प्रतिबिम्बित हुई देवांगनाओंके मुखकी छाया कमलोंकी शोभा बढ़ा रही है ॥६५॥ हे नाथ, आप अपने आत्मामें अपने ही आत्माके द्वारा अपने आत्माको उत्पन्न कर प्रकट हुए हैं, इसलिये आप स्वयंभू अर्थात् अपने आप उत्पन्न हुए कहलाते हैं। इसके सिवाय आपका माहात्म्य भी अचिन्त्य है अतः आपके लिये नमस्कार हो ॥६६॥ आप तीनों लोकोंके स्वामी हैं इसलिये आपको नमस्कार हो, आप लक्ष्मीके भर्ता हैं इसलिये आपको नमस्कार हो, आप विद्वानोंमें श्रेष्ठ हैं इसलिये आपको नमस्कार हो और आप वक्ताओंमें श्रेष्ठ हैं इसलिये आपको नमस्कार हो ॥६७॥ हे देव, बुद्धिमान् लोग आपको कामरूपी शत्रुको नष्ट करनेवाला मानते हैं, और आपके चरण-कमल इन्द्रोंके मुकुटोंकी कान्तिके समूहसे पूजित हैं इसलिये हम लोग आपको नमस्कार करते हैं ॥६८॥ अपने ध्यानरूपी कुठारसे अतिशय मजबूत घातियाकर्मरूपी बड़े भारी वृक्षको काट डाला है तथा अनन्त संसारकी संततिको भी आपने जीत लिया है इसलिये आप अनन्तजित् कहलाते हैं ॥६९॥ हे जिनेन्द्र, तीनों लोकोंको जीत लेनेसे जिसे भारी अहंकार उत्पन्न हुआ है और जो अत्यन्त दुर्जय हैं ऐसे मृत्युराजको भी आपने जीत लिया है इसीलिये आप मृत्युंजय कहलाते हैं ॥७०॥ आपने संसाररूपी समस्त बन्धन नष्ट कर दिये हैं, आप भव्य जीवोंके बन्धु हैं और आप जन्म मरण तथा बुढ़ापा इन तीनोंका नाश

---

१ –भानीर– ल० । २ सम्पाद्य । ३ कामारिघ्नम् । ४ त्वामानुमः सुरेण्मौलिभामाला– ल० । त्वामानुमः सुरेण्मौलिस्रग्माला– द० । ५ मुद्गर । ६ दुर्दम्य– ल० । ७ –स्त्वमेवासि– ल० ।

त्रिकालविषयाशेषतत्त्वभेदात् त्रिधोत्थितम् । केवलाख्यं दधच्चक्षुस्त्रिनेत्रोऽसि त्वमीशितः ॥७२॥
त्वामन्धकान्तकं प्राहुः मोहान्धासुरमर्दनात् । [1]अर्धं ते नारयो यस्मादर्धनारीश्वरोऽस्यतः ॥७३॥
शिवः शिवपदाध्यासाद्[2] दुरितारिहरो हरः । शङ्करः कृतशं[3] लोके शम्भवस्त्वं भवन्सुखे[4] ॥७४॥
वृषभोऽसि जगज्ज्येष्ठः पुरुः पुरुगुणोदयैः । नाभेयो नाभिसम्भूतेः इक्ष्वाकुकुलनन्दनः ॥७५॥
त्वमेकः पुरुषस्कन्ध[5]स्त्वं द्वे लोकस्य लोचने । त्वं त्रिधा [6]बुद्धसन्मार्गस्त्रिज्ञस्त्रिज्ञानधारकः ॥७६॥
[7]चतुःशरणमाङ्गल्यमूर्तिस्त्वं चतुरस्र[8]धीः । [9]पञ्चब्रह्ममयो देव पावनस्त्वं पुनीहि माम् ॥७७॥
स्वर्गावतरणे तुभ्यं सद्योजातात्मने नमः । जन्माभिषेकवामाय[10] वामदेव नमोऽस्तु ते ॥७८॥
[11]सन्निष्क्रान्तावघोराय परं प्रशममीयुषे । केवलज्ञानसंसिद्धावीशानाय नमोऽस्तु ते ॥७९॥

करनेवाले हैं इसलिये आप ही 'त्रिपुरारि' कहलाते हैं ॥७१॥ हे ईश्वर, जो तीनों काल-विषयक समस्त पदार्थोंको जाननेके कारण तीन प्रकारसे उत्पन्न हुआ कहलाता है ऐसे केवलज्ञान नामक नेत्रको आप धारण करते हैं इसलिये आप ही 'त्रिनेत्र' कहे जाते हैं ॥७२॥ आपने मोहरूपी अंधासुरको नष्ट कर दिया है इसलिये विद्वान् लोग आपको ही 'अन्धकान्तक' कहते हैं, आठ कर्मरूपी शत्रुओंमेंसे आपके आधे अर्थात् चार घातिया कर्मरूपी शत्रुओंके ईश्वर नहीं हैं इसलिये आप 'अर्धनारीश्वर'* कहलाते हैं ॥७३॥ आप शिवपद अर्थात् मोक्षस्थानमें निवास करते हैं इसलिये 'शिव' कहलाते हैं, पापरूपी शत्रुओंका नाश करनेवाले हैं इसलिये 'हर' कहलाते हैं, लोकमें शान्ति करनेवाले हैं इसलिये 'शंकर' कहलाते हैं और सुखसे उत्पन्न हुए हैं इसलिये 'शंभव' कहलाते हैं ॥७४॥ जगत्में श्रेष्ठ हैं इसलिये 'वृषभ' कहलाते हैं, अनेक उत्तम उत्तम गुणोंका उदय होनेसे 'पुरु' कहलाते हैं, नाभिराजासे उत्पन्न हुए हैं इसलिये 'नाभेय' कहलाते हैं और इक्ष्वाकु-कुलमें उत्पन्न हुए हैं इसलिये इक्ष्वाकुकुलनन्दन कहलाते हैं ॥७५॥ समस्त पुरुषोंमें श्रेष्ठ आप एक ही है, लोगोंके नेत्र होनेसे आप दो रूप धारण करनेवाले हैं तथा आप सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चारित्रके भेदसे तीन प्रकारका मोक्षमार्ग जानते हैं अथवा भूत भविष्यत् और वर्तमानकाल सम्बन्धी तीन प्रकारका ज्ञान धारण करते हैं इसलिये आप 'त्रिज्ञ भी कहलाते हैं ॥७६॥ अरहंत, सिद्ध, साधु और केवली भगवान्के द्वारा कहा हुआ धर्म ये चार शरण तथा मंगल कहलाते हैं आप इन चारोंकी मूर्तिस्वरूप हैं, आप चतुरस्रधी हैं अर्थात् चारों ओरकी समस्त वस्तुओंको जाननेवाले हैं, पंच परमेष्ठीरूप हैं और अत्यन्त पवित्र हैं । इसलिये हे देव, मुझे भी पवित्र कीजिये ॥७७॥ हे नाथ, आप स्वर्गावतरणके समय सद्योजात अर्थात् शीघ्र ही उत्पन्न होनेवाले कहलाये थे इसलिये आपको नमस्कार हो, आप जन्माभिषेकके समय वहुत सुन्दर जान पड़ते थे इसलिये हे वामदेव, आपके लिये नमस्कार हो ॥७८॥

दीक्षा कल्याणकके समय आप परम शान्तिको प्राप्त हुए और केवलज्ञानके प्राप्त होनेपर परम पदको प्राप्त हुए तथा ईश्वर कहलाये इसलिये आपको नमस्कार हो ॥७९॥

---

१ यस्मात्ते ज्ञानावरणाद्यष्टविधकर्मादिषु घातिरूपार्द्धमरयो न अतः कारणात् अर्धनारीश्वरोऽसि । २ निवसनात् । ३ सुखकारकः । ४ भवत्सुखः –द० । ५ ग्रीवा । धौरेय इत्यर्थः । ६ सम्यग्दर्शनज्ञानचारित्र-रूपेण ज्ञातमोक्षमार्गः । ७ अरहन्तशरणमित्यादिचतुःशरणमङ्गलमूर्तिः । ८ सम्पूर्णबुद्धिः । ९ पञ्चपरमेष्ठि-स्वरूपः । १० मनोहराय । ११ परिनिष्क्रमणे । सुनिष्क्रान्तावघोराय पदं परममीयुषे –इ०, स० ।

* अर्धा न अरीश्वराः यस्य स अर्धनारीश्वरः [अर्ध + न + अरि + ईश्वरः – अर्धनारीश्वरः]

[1]पुरस्तत्पुरुषत्वेन[2] विमुक्तिपदभागिने । [3]नमस्तत्पुरुषावस्थां भाविनीं तेऽद्य बिभ्रते ॥८०॥
ज्ञानावरणनिर्ह्रासा[4]न्नमस्तेऽनन्तचक्षुषे[5] । दर्शनावरणोच्छेदान्नमस्ते[6] विश्वदृश्वने[7] ॥८१॥
नमो दर्शनमोहघ्ने[8] क्षायिकामलदृष्टये । नमश्चारित्रमोहघ्ने विरागाय महौजसे ॥८२॥
नमस्तेऽनन्तवीर्याय नमोऽनन्तसुखात्मने । नमस्तेऽनन्तलोकाय लोकालोकावलोकिने ॥८३॥
नमस्तेऽनन्तदानाय नमस्तेऽनन्तलब्धये[9] । नमस्तेऽनन्तभोगाय नमोऽनन्तोपभोग ते ॥८४॥
नमः परमयोगाय नमस्तुभ्यमयोनये । नमः परमपूताय नमस्ते परमर्षये ॥८५॥
नमः परमविद्याय[10] नमः परमतच्छिदे । नमः परमतत्त्वाय नमस्ते परमात्मने ॥८६॥
नमः परमरूपाय नमः परमतेजसे । नमः परममार्गाय[11] नमस्ते परमेष्ठिने[12] ॥८७॥
परमं भेजुषे धाम परमज्योतिषे नमः । नमः [13]पारेतमः प्राप्तधाम्ने परतरात्मने[14] ॥८८॥
नमः क्षीणकलङ्काय क्षीणबन्ध नमोऽस्तु ते । नमस्ते क्षीणमोहाय क्षीणदोषाय[15] ते नमः ॥८९॥

अब आगे शुद्ध आत्मस्वरूपके द्वारा मोक्षस्थानको प्राप्त होंगे, इसलिये आगामी कालमें प्राप्त होनेवाली सिद्ध अवस्थाको धारण करनेवाले आपके लिये मेरा आज ही नमस्कार हो ॥८०॥ ज्ञानावरण कर्मका नाश होनेसे जो अनन्तचक्षु अर्थात् अनन्तज्ञानी कहलाते हैं ऐसे आपके लिये नमस्कार हो और दर्शनावरण कर्मका विनाश हो जानेसे जो विश्वदृश्वा अर्थात् समस्त संसारको देखनेवाले कहलाते हैं ऐसे आपके लिये नमस्कार हो ॥८१॥ हे भगवन्, आप दर्शन मोहनीय कर्मको नष्ट करनेवाले तथा निर्मल क्षायिक सम्यग्दर्शनको धारण करनेवाले हैं इसलिये आपको नमस्कार हो इसी प्रकार आप चारित्रमोहनीय कर्मको नष्ट करनेवाले वीतराग और अतिशय तेजस्वी हैं इसलिये आपको नमस्कार हो ॥८२॥ आप अनन्तवीर्यको धारण करनेवाले हैं इसलिये आपको नमस्कार हो, आप अनन्तसुखरूप हैं इसलिये आपको नमस्कार हो, आप अनन्तप्रकाशसे सहित तथा लोक और अलोकको देखनेवाले हैं इसलिये आपको नमस्कार हो ॥८३॥ अनन्तदानको धारण करनेवाले आपके लिये नमस्कार हो, अनन्तलाभको धारण करनेवाले आपके लिये नमस्कार हो, अनन्तभोगको धारण करनेवाले आपके लिये नमस्कार हो, और अनन्त उपभोगको धारण करनेवाले आपके लिये नमस्कार हो ॥८४॥ हे भगवन्, आप परम ध्यानी हैं इसलिये आपको नमस्कार हो, आप अयोनि अर्थात् योनिभ्रमणसे रहित हैं इसलिये आपको नमस्कार हो, आप अत्यन्त पवित्र हैं इसलिये आपको नमस्कार हो और आप परमऋषि हैं इसलिये आपको नमस्कार हो ॥८५॥ आप परमविद्या अर्थात् केवलज्ञानको धारण करनेवाले हैं, अन्य सब मतोंका खण्डन करनेवाले हैं, परमतत्त्व स्वरूप हैं और परमात्मा हैं इसलिये आपको नमस्कार हो ॥८६॥ आप उत्कृष्ट रूपको धारण करनेवाले हैं, परम तेजस्वी हैं, उत्कृष्ट मार्गस्वरूप हैं और परमेष्ठी हैं इसलिये आपको नमस्कार हो ॥८७॥ आप सर्वोत्कृष्ट मोक्षस्थानकी सेवा करनेवाले हैं, परम ज्योतिःस्वरूप हैं, आपका ज्ञानरूपी तेज अन्धकारसे परे है और आप सर्वोत्कृष्ट हैं इसलिये आपको नमस्कार हो ॥८८॥ आप कर्मरूपी कलंकसे रहित हैं इसलिये आपको नमस्कार हो, आपका कर्मबन्धन क्षीण हो गया है इसलिये आपको नमस्कार हो, आपका मोहकर्म नष्ट हो गया है इसलिये आपको नमस्कार हो

---

१ अग्रे । २ शुद्धात्मस्वरूपत्वेन । ३ नमस्तात् –ल० । ४ विनाशात् । ५ अनन्तज्ञानाय । ६ विनाशात् । ७ सकलदर्शिने । ८ दर्शनमोहघ्ने इति समर्थनरूपमेवमुत्तरत्रापि यथायोग्यं योज्यम् । ९ अनन्तलाभाय । १० केवलज्ञानाय । ११ रत्नत्रय । १२ परमपदस्थिताय । १३ तमसः पारं प्राप्ततेजसे । १४ उत्कृष्टस्वरूपाय । १५ क्षीणदोषास्तु ते नमः –ल० ।

नमः सुगतये तुभ्यं शोभनां गतिमीयुषे । नमस्तेऽतीन्द्रियज्ञानसुखायानिन्द्रियात्मने ॥९०॥
कायबन्धननिर्मोक्षाद् अकायाय नमोऽस्तु ते । नमस्तुभ्यमयोगाय योगिनामधियोगिने ॥९१॥
अवेदाय नमस्तुभ्यम् अकषायाय ते नमः । नमः परमयोगीन्द्र वन्दिताङ्घ्रिद्वयाय ते ॥९२॥
नमः परमविज्ञान नमः परमसंयम । नमः परमदृग्दृष्टपरमार्थाय तायिने[1] ॥९३॥
नमस्तुभ्यमलेश्याय[2] शुद्धलेश्यांशकस्पृशे । नमो भव्येतरावस्थाव्यतीताय विमोक्षिणे ॥९४॥
[3]सञ्ज्यसञ्ज्ञिद्वयावस्थाव्यतिरिक्तामलात्मने । नमस्ते वीतसञ्ज्ञाय[4] नमः क्षायिकदृष्टये ॥९५॥
अनाहाराय तृप्ताय नमः परमभाजुषे । व्यतीताशेषदोषाय भवाब्धेः पारमायुषे[5] ॥९६॥
अजराय नमस्तुभ्यं नमस्ते स्तादजन्मने । अमृत्यवे नमस्तुभ्यम् अचलायाक्षरात्मने[6] ॥९७॥
अलमास्तां गुणस्तोत्रम् अनन्तास्तावका गुणाः । त्वां नामस्मृतिमात्रेण पर्युपासिसिषामहे[7] ॥९८॥
प्रसिद्धाष्ट[8]सहस्रेद्धलक्षणं त्वां गिरां पतिम् । [9]नाम्नामष्टसहस्रेण [10]तोष्टुमोऽभीष्टसिद्धये ॥९९॥

और आपके समस्त राग आदि दोष नष्ट हो गये हैं इसलिये आपको नमस्कार हो ॥८९॥ आप मोक्ष रूपी उत्तम गतिको प्राप्त होनेवाले हैं इसलिये सुगति हैं अतः आपको नमस्कार हो, आप अतीन्द्रियज्ञान और सुखसे सहित हैं तथा इन्द्रियोंसे रहित अथवा इन्द्रियोंके अगोचर हैं इसलिए आपको नमस्कार हो ॥९०॥ आप शरीररूपी बन्धनके नष्ट हो जानेसे अकाय कहलाते हैं इसलिये आपको नमस्कार हो, आप योगरहित हैं और योगियों अर्थात् मुनियोंमें सबसे उत्कृष्ट हैं इसलिये आपको नमस्कार हो ॥९१॥ आप वेदरहित हैं, कषायरहित हैं, और बड़े बड़े योगिराज भी आपके चरणयुगलकी वन्दना करते हैं इसलिये आपको नमस्कार हो ॥९२॥ हे परमविज्ञान, अर्थात् उत्कृष्ट-केवलज्ञानको धारण करनेवाले, आपको नमस्कार हो, हे परम संयम, अर्थात् उत्कृष्ट-यथाख्यात चारित्रको धारण करनेवाले, आपको नमस्कार हो। हे भगवन्, आपने उत्कृष्ट केवल-दर्शनके द्वारा परमार्थको देख लिया है तथा आप सबकी रक्षा करनेवाले हैं इसलिये आपको नमस्कार हो ॥९३॥ आप यद्यपि लेश्याओंसे रहित हैं तथापि उपचारसे शुद्ध-शुक्ललेश्याके अंशोंका स्पर्श करनेवाले हैं, भव्य तथा अभव्य दोनों ही अवस्थाओंसे रहित हैं और मोक्ष-रूप हैं इसलिये आपको नमस्कार हो ॥९४॥ आप संज्ञी और असंज्ञी दोनों अवस्थाओंसे रहित निर्मल आत्माको धारण करनेवाले हैं, आपकी आहार, भय, मैथुन और परिग्रह ये चारों संज्ञाएं नष्ट हो गई हैं तथा क्षायिक सम्यग्दर्शनको धारण कर रहे हैं इसलिये आपको नमस्कार हो ॥९५॥ आप आहार रहित होकर भी सदा तृप्त रहते हैं, परम दीप्तिको प्राप्त हैं, आपके समस्त दोष नष्ट हो गये हैं और आप संसाररूपी समुद्रके पारको प्राप्त हुए हैं इसलिये आपको नमस्कार हो ॥९६॥ आप बुढ़ापारहित हैं, जन्मरहित हैं, मृत्युरहित हैं अचलरूप हैं और अविनाशी हैं इसलिये आपको नमस्कार हो ॥९७॥ हे भगवन्, आपके गुणोंका स्तवन दूर रहे, क्योंकि आपके अनन्त गुण हैं उन सबका स्तवन होना कठिन है इसलिये केवल आपके नामोंका स्मरण करके ही हमलोग आपकी उपासना करना चाहते हैं ॥९८॥ आपके देदीप्यमान एक हजार आठ लक्षण अतिशय प्रसिद्ध हैं और आप समस्त वाणियोंके स्वामी हैं इसलिये हम लोग अपनी अभीष्ट सिद्धिके लिये एक हजार आठ नामोंसे आपकी स्तुति करते हैं ॥ ९९ ॥ आप अनन्तचतुष्टयरूप अन्तरङ्गलक्ष्मी

१ पालकाय। २ शुक्ललेश्यां मुक्त्वा इतरपञ्चलेश्यारहिताय। ३ संज्ञा संज्ञि - ल०। ४ विशेषेण प्राप्तसज्ज्ञानाय। ५ –मीयुषे –ल०। ६ अविनश्वरस्वरूपाय। ७ उपासनं कर्तुमिच्छामः। ८ अष्टोत्तरसहस्र। ९ अष्टोत्तरसहस्रेण। १० स्तुतिं कुर्मः।

श्रीमान् स्वयम्भूर्वृषभः[2] शम्भवः[3] शम्भुरात्मभूः। स्वयंप्रभः[4] प्रभुर्भोक्ता विश्वभूरपुनर्भवः ॥१००॥
विश्वात्मा विश्वलोकेशो विश्वतश्चक्षुरक्षरः। विश्वविद् विश्वविद्येशो विश्वयोनिरनश्वरः ॥१०१॥
विश्वदृश्वा विभुर्धाता विश्वेशो विश्वलोचनः। विश्वव्यापी विधिर्वेधाः शाश्वतो विश्वतोमुखः ॥१०२॥

और अष्ट प्रातिहार्यरूप बहिरङ्ग लक्ष्मीसे सहित हैं इसलिये श्रीमान् १ कहलाते हैं, आप अपने आप उत्पन्न हुए हैं–किसी गुरुके उपदेशकी सहायताके बिना अपने आपही संबुद्ध हुए हैं इसलिये स्वयंभू २ कहलाते हैं, आप वृष अर्थात् धर्मसे सुशोभित हैं इसलिये वृषभ ३ कहलाते हैं, आपके स्वयं अनन्त सुखकी प्राप्ति हुई है तथा आपके द्वारा संसारके अन्य अनेक प्राणियोंको सुख प्राप्त हुआ है इसलिये शंभव ४ कहलाते हैं, आप परमानन्दरूप सुखके देनेवाले हैं इसलिये शंभु ५ कहलाते हैं, आपने यह उत्कृष्ट अवस्था अपने ही द्वारा प्राप्त की है अथवा योगीश्वर अपनी आत्मामें ही आपका साक्षात्कार कर सकते हैं इसलिये आप आत्मभू ६ कहलाते हैं, आप अपने आपही प्रकाशमान होते हैं इसलिये स्वयंप्रभ ७ हैं, आप समर्थ अथवा सबके स्वामी हैं इसलिये प्रभु ८ हैं, अनन्त-आत्मोत्थ सुखका अनुभव करनेवाले हैं इसलिये भोक्ता हैं ९, केवलज्ञानकी अपेक्षा सब जगह व्याप्त हैं अथवा ध्यानादिके द्वारा सब जगह प्रत्यक्षरूपसे प्रकट होते हैं इसलिये विश्वभू १० हैं, अब आप पुनः संसारमें आकर जन्म धारण नहीं करेंगे इसलिये अपुनर्भव ११ हैं ॥१००॥ संसारके समस्त पदार्थ आपकी आत्मामें प्रतिबिम्बित हो रहे हैं इसलिये आप विश्वात्मा १२ कहलाते हैं, आप समस्त लोकके स्वामी हैं इसलिये विश्वलोकेश १३ कहलाते हैं, आपके ज्ञानदर्शनरूपी नेत्र संसारमें सभी ओर अप्रतिहत हैं इसलिये आप विश्वतश्चक्षु १४ कहलाते हैं, अविनाशी हैं इसलिये अक्षर १५ कहे जाते हैं, समस्त पदार्थोंको जानते हैं इसलिये विश्वविद् १६ कहलाते हैं, समस्त विद्याओंके स्वामी हैं इसलिये विश्वविद्येश १७ कहे जाते हैं, समस्त पदार्थोंकी उत्पत्तिके कारण हैं अर्थात् उपदेश देनेवाले हैं इसलिये विश्वयोनि १८ कहलाते हैं, आपके स्वरूपका कभी नाश नहीं होता इसलिये अनश्वर १९ कहे जाते हैं ॥१०१॥ समस्त पदार्थोंको देखनेवाले हैं इसलिये विश्वदृश्वा २० हैं, केवलज्ञानकी अपेक्षा सब जगह व्याप्त हैं अथवा सब जीवोंको संसारसे पार करनेमें समर्थ हैं अथवा परमोत्कृष्ट विभूतिसे सहित हैं इसलिये विभु २१ हैं, संसारी जीवोंका उद्धार कर उन्हें मोक्षस्थानमें धारण करनेवाले हैं–पहुँचानेवाले हैं अथवा सब जीवोंका पोषण करनेवाले हैं अथवा मोक्षमार्गकी सृष्टि करनेवाले हैं इसलिये धाता २२ कहलाते हैं, समस्त जगत्के ईश्वर हैं इसलिये विश्वेश २३ कहलाते हैं, सब पदार्थोंको देखनेवाले हैं अथवा सबके हित सन्मार्गका उपदेश देनेके कारण सब जीवोंके नेत्रोंके समान हैं इसलिये विश्वविलोचन २४ कहे जाते हैं, संसारके समस्त पदार्थोंको जाननेके कारण आपका ज्ञान सब जगह व्याप्त है इसलिये आप विश्वव्यापी २५ कहलाते हैं। आप समीचीन मोक्षमार्गका विधान करनेसे विधि २६ कहलाते हैं। धर्मरूप जगत्की सृष्टि करनेवाले हैं इसलिये वेधा २७ कहलाते हैं, सदा विद्यमान रहते हैं इसलिये शाश्वत २८ कहे जाते हैं, समवसरण सभामें आपके मुख चारों दिशाओंसे दिखते हैं अथवा आप विश्वतोमुख अर्थात् जलकी तरह पापरूपी पंकको

१ स्वयमात्मना भवतीति। २ वृषेण धर्मेण भवतीति। ३ शं सुखे भवतीति। ४ स्वयं-प्रकाशः। ५ कारणम्।

विश्वकर्मा जगज्ज्येष्ठो विश्वमूर्तिर्जिनेश्वरः । विश्वदृग्विश्वभूतेशो विश्वज्योतिरनीश्वरः ॥१०३॥
जिनो जिष्णुरमेयात्मा विश्व[1]रीशो जगत्पतिः । [2]अनन्तजिदचिन्त्यात्मा भव्यबन्धुरबन्धनः ॥१०४॥
युगादिपुरुषो ब्रह्मा पञ्च[3]ब्रह्ममयः शिवः । परः परतरः सूक्ष्मः परमेष्ठी सनातनः ॥१०५॥
स्वयं ज्योतिरजोऽजन्मा [4]ब्रह्मयोनिरयोनिजः । [5]मोहारिविजयी जेता[6] धर्मचक्री दयाध्वजः ॥१०६॥

दूर करनेवाले, स्वच्छ तथा तृष्णाको नष्ट करनेवाले हैं इसलिये विश्वतोमुख २९ कहे जाते हैं ॥१०२॥ आपने कर्मभूमिकी व्यवस्था करते समय लोगोंकी आजीविकाके लिये असि-मषी आदि सभी कर्मों-कार्योंका उपदेश दिया था इसलिये आप विश्वकर्मा ३० कहलाते हैं, आप जगत्‌में सबसे ज्येष्ठ अर्थात् श्रेष्ठ हैं इसलिये जगज्ज्येष्ठ ३१ कहे जाते हैं, आप अनन्त गुणमय हैं अथवा समस्त पदार्थोंके आकार आपके ज्ञानमें प्रतिफलित हो रहे हैं इसलिये आप विश्वमूर्ति ३२ हैं, कर्मरूप शत्रुओंको जीतनेवाले सम्यग्दृष्टि आदि जीवोंके आप ईश्वर हैं इसलिये जिनेश्वर ३३ कहलाते हैं, आप संसारके समस्त पदार्थोंका सामान्यावलोकन करते हैं इसलिये विश्वदृक् ३४ कहलाते हैं, समस्त प्राणियोंके ईश्वर हैं इसलिये विश्वभूतेश ३५ कहे जाते हैं, आपकी केवलज्ञानरूपी ज्योति अखिल संसारमें व्याप्त है इसलिये आप विश्वज्योति ३६ कहलाते हैं, आप सबके स्वामी हैं किन्तु आपका कोई भी स्वामी नहीं है इसलिये आप अनीश्वर ३७ कहे जाते हैं ॥१०३॥ आपने घातिया-कर्मरूपी शत्रुओंको जीत लिया है इससे आप जिन ३८ कहलाते हैं, कर्मरूपी शत्रुओंको जीतना ही आपका शील अर्थात् स्वभाव है इसलिये आप जिष्णु ३९ कहे जाते हैं, आपकी आत्माको अर्थात् आपके अनन्त गुणोंको कोई नहीं जान सका है इसलिये आप अमेयात्मा ४० हैं, पृथिवीके ईश्वर हैं इसलिये विश्वरीश ४१ कहलाते हैं, तीनों लोकोंके स्वामी हैं इसलिये जगत्पति ४२ कहे जाते हैं, अनन्त संसार अथवा मिथ्यादर्शनको जीत लेनेके कारण आप अनन्तजित् ४३ कहलाते हैं, आपकी आत्माका चिन्तवन मनसे भी नहीं किया जा सकता इसलिये आप अचिन्त्यात्मा ४४ हैं, भव्य जीवोंके हितैषी हैं इसलिये भव्यबन्धु ४५ कहलाते हैं, कर्मबन्धनसे रहित होनेके कारण अबन्धन ४६ कहलाते हैं ॥१०४॥ आप इस कर्मभूमिरूपी युगके प्रारम्भमें उत्पन्न हुए थे इसलिये युगादिपुरुष ४७ कहलाते हैं, केवलज्ञान आदि गुण आपमें बृंहण अर्थात् वृद्धिको प्राप्त हो रहे हैं इसलिये आप ब्रह्मा ४८ कहे जाते है, आप पंच परमेष्ठीस्वरूप हैं, इसलिये पंच ब्रह्ममय ४९ कहलाते है, शिव अर्थात् मोक्ष अथवा आनन्दरूप होनेसे शिव ५० कहे जाते हैं, आप सब जीवोंका पालन अथवा समस्तज्ञान आदि गुणोंको पूर्ण करनेवाले हैं इसलिये पर ५१ कहलाते हैं, संसारमें सबसे श्रेष्ठ हैं इसलिये परतर ५२ कहलाते हैं, इन्द्रियोंके द्वारा आपका आकार नहीं जाना जा सकता अथवा नामकर्मका क्षय हो जानेसे आपमें बहुत शीघ्र सूक्ष्मत्व गुण प्रकट होनेवाला है इसलिये आपको सूक्ष्म ५३ कहते हैं, परमपदमें स्थित हैं इसलिये परमेष्ठी ५४ कहलाते है और सदा एकसे ही विद्यमान रहते हैं इसलिये सनातन ५५ कहे जाते हैं ॥१०५॥ आप स्वयं प्रकाशमान हैं इसलिये स्वयंज्योति ५६ कहलाते हैं, संसारमें उत्पन्न नहीं होते इसलिये अज ५७ कहे जाते हैं जन्म रहित हैं इसलिये अजन्मा ५८ कहलाते हैं, आप ब्रह्म अर्थात् वेद (द्वादशांग शास्त्र) की उत्पत्तिके कारण हैं इसलिये ब्रह्मयोनि ५९ कहलाते हैं,

१ विश्वरि मही तस्या ईशः। २ संसारजित्। ३ पञ्चपरमेष्ठिस्वरूपः। ४ आत्मयोनिः। ५ मोहारिर्विजयी –द०। ६ जयशीलः।

प्रशान्तारिरनन्तात्मा योगी योगीश्वरार्चितः । ब्रह्मविद् ब्रह्म[1]तत्त्वज्ञो ब्रह्मोद्या[2]वित्यतीश्वरः ॥१०७॥
शुद्धो बुद्धः प्रबुद्धात्मा सिद्धार्थः सिद्धशासनः । [3]सिद्धःसिद्धान्तविद्धयेयः सिद्धसाध्यो जगद्धितः ॥१०८॥
सहिष्णुरच्युतोऽनन्तः [4]प्रभविष्णुर्भवोद्भवः[5] । [6]प्रभूष्णुरजरोऽजर्यो[7] भ्राजिष्णु[8]र्धीश्वरोऽव्ययः ॥१०९॥

चौरासी लाख योनियोंमें उत्पन्न नहीं होते इसलिये अयोनिज ६० कहे जाते हैं, मोहरूपी शत्रुको जीतने वाले हैं इससे मोहारिविजयी ६१ कहलाते हैं, सर्वदा सर्वोत्कृष्ट रूपसे विद्यमान रहते हैं इसलिये जेता ६२ कहे जाते हैं, आप धर्मचक्रको प्रवर्तित करते हैं इसलिये धर्मचक्री ६३ कहलाते हैं, दया ही आपकी ध्वजा है इसलिये आप दयाध्वज ६४ कहे जाते हैं ॥१०६॥ आपके समस्त कर्मरूप शत्रु शान्त हो गये हैं इसलिये आप प्रशान्तारि ६५ कहलाते हैं, आपकी आत्माका अन्त कोई नहीं पा सका है इसलिये आप अनन्तात्मा ६६ हैं, आप योग अर्थात् केवलज्ञान आदि अपूर्व अर्थोंकी प्राप्तिसे सहित हैं अथवा ध्यानसे युक्त हैं अथवा मोक्षप्राप्तिके उपाय भूत सम्यग्दर्शनादि उपायोंसे सुशोभित हैं इसलिये योगी ६७ कहलाते हैं, योगियों अर्थात् मुनियोंके अधीश्वर आपकी पूजा करते हैं इसलिये योगीश्वरार्चित ६८ हैं, ब्रह्म अर्थात् शुद्ध आत्मस्वरूपको जानते हैं इसलिये ब्रह्मविद् ६९ कहलाते हैं, ब्रह्मचर्य अथवा आत्मारूपी तत्त्वके रहस्यको जाननेवाले हैं इसलिये ब्रह्मतत्त्वज्ञ ७० कहे जाते हैं, पूर्व ब्रह्माके द्वारा कहे हुए समस्त तत्त्व अथवा केवलज्ञानरूपी आत्मविद्याको जानते हैं इसलिये ब्रह्मोद्यावित् ७१ कहे जाते हैं, मोक्ष प्राप्त करनेके लिये यत्न करनेवाले संयमी मुनियोंके स्वामी हैं इसलिये यतीश्वर ७२ कहलाते हैं ॥१०७॥ आप रागद्वेषादि भाव कर्ममल कलंक से रहित होनेके कारण शुद्ध ७३ हैं, संसारके समस्त पदार्थोंको जाननेवाली केवलज्ञानरूपी बुद्धिसे संयुक्त होने कारण बुद्ध ७४ कहलाते हैं, आपकी आत्मा सदा शुद्ध ज्ञानसे जगमगाती रहती है इसलिये आप प्रबुद्धात्मा ७५ हैं, आपके सब प्रयोजन सिद्ध हो चुके हैं इसलिये आप सिद्धार्थ ७६ कहलाते हैं, आपका शासन सिद्ध अर्थात् प्रसिद्ध हो चुका है इसलिये आप सिद्धशासन ७७ हैं, आप अपने अनन्तगुणोंको प्राप्त कर चुके हैं अथवा बहुत शीघ्र मोक्ष अवस्था प्राप्त करने वाले हैं इसलिये सिद्ध ७८ कहलाते हैं, आप द्वादशाङ्गरूप सिद्धान्तको जाननेवाले हैं इसलिये सिद्धान्तविद् ७९ कहे जाते हैं, सभी लोग आपका ध्यान करते हैं इसलिये आप ध्येय ८० कहलाते है, आपके समस्त साध्य अर्थात् करने योग्य कार्य सिद्ध हो चुके हैं इसलिये आप सिद्धसाध्य ८१ कहलाते हैं, आप जगत्के समस्त जीवोंका हित करनेवाले हैं इससे जगद्धित ८२ कहे जाते हैं ॥१०८॥ सहनशील हैं अर्थात् क्षमा गुणके भण्डार हैं इसलिये सहिष्णु ८३ कहलाते हैं, ज्ञानादि गुणोंसे कभी च्युत नहीं होते इसलिये अच्युत ८४ कहे जाते हैं, विनाश रहित हैं, इसलिये अनन्त ८५ कहलाते हैं, प्रभावशील हैं इसलिये प्रभविष्णु ८६ कहे जाते हैं, संसारमें आपका जन्म सबसे उत्कृष्ट माना गया है इसलिये आप भवोद्भव ८७ कहलाते हैं, आप शक्तिशाली हैं इसलिये प्रभूष्णु ८८ कहे जाते हैं, वृद्धावस्थासे रहित होनेके कारण अजर ८९ हैं, आप कभी जीर्ण नहीं होते इसलिये अजर्य ९० हैं, ज्ञानादि गुणोंसे अतिशय देदीप्यमान हो रहे हैं इसलिये भ्राजिष्णु ९१ हैं, केवलज्ञानरूपी बुद्धिके ईश्वर हैं इसलिये धीश्वर ९२ कहलाते

१ मोक्षस्वरूपवित्। २ ब्रह्मणा वेदितव्यमावेत्तीति । अथवा ब्रह्मणो वदनं वचनम् । ३ सिद्धसिद्धान्त--ब०, प०, द० । ४ प्रकर्षेण भवनशीलः । ५ भवात् संसारात् उत् उद्गतो भवःउत्पत्तिर्यस्य सः । अथवा अनन्तज्ञानादिभवनरूपेण भवतीति । ६ प्रभवतीति । ७ न जीर्यत इति । ८ प्रकाशनशीलः ।

विभावसु[1]रसम्भूष्णुः स्वयम्भूष्णुः पुरातनः । परमात्मा परं ज्योतिस्त्रिजगत्परमेश्वरः ॥११०॥

इति श्रीमदादिशतम् ।

दिव्यभाषापतिर्दिव्यः पूतवाक्पूतशासनः । पूतात्मा परमज्योतिः धर्माध्यक्षो दमीश्वरः[2] ॥१११॥

श्रीपतिर्भगवानर्हन्नरजाः विरजाः शुचिः । तीर्थकृत् केवलीशानः पूजार्हः[3]स्नातकोऽमलः ॥११२॥

अनन्तदीप्तिर्ज्ञानात्मा स्वयम्बुद्धः प्रजापतिः । मुक्तः शक्तो निराबाधो निष्कलो भुवनेश्वरः ॥११३॥

हैं, कभी आपका व्यय अर्थात् नाश नहीं होता इसलिये आप अव्यय ९३ कहलाते हैं ॥१०९॥ आप कर्मरूपी ईंधनको जलानेके लिये अग्निके समान हैं अथवा मोहरूपी अन्धकारको नष्ट करनेके लिये सूर्यके समान हैं, इसलिये विभावसु ९४ कहलाते हैं, आप संसारमें पुनः उत्पन्न नहीं होंगे इसलिये असंभूष्णु ९५ कहे जाते हैं, आप अपने आप ही इस अवस्थाको प्राप्त हुए हैं इसलिये स्वयंभूष्णु ९६ हैं, प्राचीन हैं–द्रव्यार्थिक नयकी अपेक्षा अनादिसिद्ध हैं इसलिये पुरातन ९७ कहलाते हैं, आपकी आत्मा अतिशय उत्कृष्ट है इसलिये आप परमात्मा ९८ कहे जाते हैं, उत्कृष्ट ज्योतिःस्वरूप हैं इसलिये परंज्योति ९९ कहलाते हैं, तीनों लोकोंके ईश्वर हैं, इसलिए त्रिजगत्परमेश्वर १०० कहे जाते हैं ॥११०॥

आप दिव्य-ध्वनिके पति हैं इसलिये आपको दिव्यभाषापति १०१ कहते हैं, अत्यन्त सुन्दर हैं इसलिये आप दिव्य १०२ कहलाते हैं, आपके वचन अतिशय पवित्र हैं इसलिये आप पूतवाक् १०३ कहे जाते हैं, आपका शासन पवित्र होनेसे आप पूतशासन १०४ कहलाते हैं, आपकी आत्मा पवित्र है इसलिये आप पूतात्मा १०५ कहे जाते हैं, उत्कृष्ट ज्योति स्वरूप हैं इसलिये परमज्योति १०६ कहलाते हैं, धर्मके अध्यक्ष हैं इसलिये धर्माध्यक्ष १०७ कहे जाते हैं, इन्द्रियोंको जीतनेवालोंमें श्रेष्ठ हैं इसलिये दमीश्वर १०८ कहलाते हैं॥१११॥मोक्षरूपी लक्ष्मीके अधिपति हैं इसलिये श्रीपति १०९ कहलाते हैं, अष्टप्रातिहार्यरूप उत्तम ऐश्वर्यसे सहित हैं इसलिये भगवान् ११० कहे जाते हैं, सबके द्वारा पूज्य हैं इसलिये अर्हन् १११ कहलाते है, कर्मरूपी धूलिसे रहित हैं इसलिये अरजाः ११२ कहे जाते हैं, आपके द्वारा भव्य जीवोंके कर्ममल दूर होते हैं अथवा आप ज्ञानावरण तथा दर्शनावरण कर्मसे रहित हैं इसलिये विरजाः ११३ कहलाते हैं, अतिशय पवित्र हैं इसलिये शुचि ११४ कहे जाते हैं, धर्मरूप तीर्थके करनेवाले हैं इसलिये तीर्थकृत् ११५ कहलाते हैं, केवलज्ञानसे सहित होनेके कारण केवली ११६ कहे जाते हैं, अनन्त सामर्थ्यसे युक्त होनेके कारण ईशान ११७ कहलाते हैं, पूजाके योग्य होनेसे पूजार्ह ११८ हैं, घातिया कर्मोंके नष्ट होने अथवा पूर्णज्ञान होनेसे आप स्नातक ११९ कहलाते हैं, आपका शरीर मल रहित है अथवा आत्मा राग द्वेष आदि दोषोंसे वर्जित है इसलिये आप अमल १२० कहे जाते हैं ॥११२॥ आप केवलज्ञानरूपी अनन्त दीप्ति अथवा शरीरकी अपरिमित प्रभाके धारक हैं इसलिये अनन्तदीप्ति १२१ कहलाते हैं, आपकी आत्मा ज्ञानस्वरूप है इसलिये आप ज्ञानात्मा १२२ हैं, आप स्वयं संसारसे विरक्त होकर मोक्षमार्गमें प्रवृत्त हुए हैं अथवा आपने गुरुओंकी सहायताके विना ही समस्त पदार्थोंका ज्ञान प्राप्त किया है इसलिये स्वयंबुद्ध १२३ कहलाते हैं, समस्त जनसमूहके रक्षक होनेसे आप प्रजापति १२४ हैं, कर्मरूप बन्धनसे रहित हैं इसलिये मुक्त १२५ कहलाते हैं, अनन्तबलसे सम्पन्न होनेके कारण शक्त १२६ कहे जाते

१ विभा प्रभा अस्मिन् वसतीति । दहन इति वा । २ महेश्वरः –द०, प० । ३ विशिष्टज्ञानी । ४ समाप्तवेदः, सम्पूर्णज्ञानीत्यर्थः ।

निरञ्जनो जगज्ज्योतिर्निरु[1]क्तोक्तिर[2]नामयः । अचलस्थितिरक्षोभ्यः कूटस्थः[3] [4]स्थाणुरक्षयः ॥११४॥
अग्रणीर्ग्रा[5]मणीर्नेता प्रणेता [6]न्यायशास्त्रकृत् । शास्ता धर्मपतिर्धर्म्यो धर्मात्मा धर्मतीर्थकृत् ॥११५॥
वृषध्वजो वृषाधीशो वृषकेतुर्वृषायुधः । [7]वृषो वृषपतिर्भर्ता वृषभाङ्को वृषोद्भवः ॥११६॥
हिरण्यनाभिर्भूतात्मा[8] भूतभृद् भूतभावनः[10] । प्रभवो विभवो भास्वान् भवो[11] भावो[12] भवान्तकः ।११७।

हैं, बाधा-उपसर्ग आदिसे रहित हैं इसलिये निराबाध १२७ कहलाते हैं, शरीर अथवा मायासे रहित होनेके कारण निष्कल १२८ कहे जाते हैं और तीनों लोकोंके ईश्वर होनेसे भुवनेश्वर १२९ कहलाते हैं ॥११३॥ आप कर्मरूपी अंजनसे रहित हैं इसलिये निरंजन १३० कहलाते हैं, जगत्को प्रकाशित करनेवाले हैं इसलिये जगज्ज्योति १३१ कहे जाते हैं, आपके वचन सार्थक हैं अथवा पूर्वापर विरोधसे रहित हैं इसलिये आप निरुक्तोक्ति १३२ कहलाते हैं, रोग रहित होनेसे अनामय १३३ हैं, आपकी स्थिति अचल है इसलिये अचल-स्थिति १३४ कहलाते हैं, आप कभी क्षोभको प्राप्त नहीं होते इसलिये अक्षोभ्य १३५ हैं, नित्य होनेसे कूटस्थ १३६ हैं, गमनागमनसे रहित होनेके कारण स्थाणु १३७ हैं और क्षय रहित होनेके कारण अक्षय १३८ हैं ॥११४॥ आप तीनों लोकोंमें सबसे श्रेष्ठ हैं इसलिये अग्रणी १३९ कहलाते है, भव्यजीवोंके समूहको मोक्ष प्राप्त करानेवाले हैं इसलिये ग्रामणी १४० हैं, सब जीवोंको हितके मार्गमें प्राप्त कराते हैं इसलिये नेता १४१ हैं, द्वाद-शांगरूप शास्त्रकी रचना करनेवाले हैं इसलिये प्रणेता १४२ हैं, न्यायशास्त्रका उपदेश देनेवाले हैं इसलिये न्यायशास्त्रकृत् १४३ कहे जाते हैं, हितका उपदेश देनेके कारण शास्ता १४४ कहलाते हैं, उत्तम क्षमा आदि धर्मोंके स्वामी हैं इसलिये धर्मपति १४५ कहे जाते हैं, धर्मसे सहित हैं इसलिये धर्म्य १४६ कहलाते हैं, आपकी आत्मा धर्मरूप अथवा धर्मसे उपलक्षित है इसलिये आप धर्मात्मा १४७ कहलाते हैं और आप धर्मरूपी तीर्थके करनेवाले हैं इसलिये धर्मतीर्थकृत् १४८ कहे जाते हैं ॥११५॥ आपकी ध्वजामें वृष अर्थात् बैलका चिह्न है अथवा धर्म ही आपकी ध्वजा है अथवा आप वृषभ चिह्नसे अंकित हैं इसलिये वृषध्वज १४९ कहलाते हैं आप वृष अर्थात् धर्मके पति हैं इसलिये वृषाधीश १५० कहे जाते हैं, आप धर्मकी पताका स्वरूप हैं इसलिये लोग आपको वृषकेतु १५१ कहते हैं, आपने कर्मरूप शत्रुओंको नष्ट करनेके लिये धर्मरूप शस्त्र धारण किये हैं इसलिये आप वृषायुध १५२ कहे जाते हैं, आप धर्मरूप हैं इसलिये वृष १५३ कहलाते हैं, धर्मके स्वामी हैं इसलिये वृषपति १५४ कहे जाते हैं, समस्त जीवोंका भरण-पोषण करते हैं इसलिये भर्ता १५५ कहलाते हैं, वृषभ अर्थात् बैलके चिह्नसे सहित हैं इसलिये वृषभाङ्क १५६ कहे जाते है और पूर्व पर्यायोंमें उत्तम धर्म करनेसे ही आप तीर्थंकर होकर उत्पन्न हुए हैं इसलिये आप वृषोद्भव १५७ कहलाते हैं ॥११६॥ सुन्दर नाभि होनेसे आप हिरण्यनाभि १५८ कहलाते हैं, आपकी आत्मा सत्यरूप है इस-लिये आप भूतात्मा १५९ कहे जाते हैं, आप समस्त जीवोंकी रक्षा करते हैं इसलिये पण्डितजन आपको भूतभृत् १६० कहते हैं, आपकी भावनाएं बहुत ही उत्तम हैं, इस-लिये आप भूतभावन १६१ कहलाते हैं, आप मोक्षप्राप्तिके कारण हैं अथवा आपका जन्म

१ प्रामाणिकवचनः । २ –निरामयः –प०, ब० । ३ नित्यः । ४ स्थानशीलः । ५ ग्रामं समुदायं नयतीति । ६ युक्त्यागम । ७ धर्मवर्षणात् । ८ विद्यमानस्वरूपः । ९ प्राणिगणपोषकः । १० भूतं मङ्गलं भावयतीति । ११ भवतीति । १२ भावयतीति भावः ।

हिरण्यगर्भः[1] श्रीगर्भः प्रभूतविभवोऽभवः । स्वयंप्रभः प्रभूतात्मा भूतनाथो जगत्पतिः ॥११८॥
सर्वादिः सर्वदिक् सार्वः सर्वज्ञः सर्वदर्शनः । सर्वात्मा सर्वलोकेशः सर्ववित् सर्वलोकजित् ॥११९॥
सुगतिः सुश्रुतः [2]सुश्रुत् सुवाक् सूरिर्बहुश्रुतः । विश्रुतो विश्वतः पादो[3] विश्वशीर्षः शुचिश्रवाः[4] ॥१२०॥

